
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2332 विषय

नाव वृत्तरत्नाकरव्य छंद I व II भाग

लेखक / लिपीकार जगन्नाथ भटट

पृठ 22 काळ ____ पूर्ण / अपूर्ण ✓

M-2352

वृत्तरत्नाकराख्यछंदःसेतुपुस्तकारंभ
पत्रमिदम्‌ ॥ श्रीरस्तु। श्रीगंगाधरोजयति॥

श्रीमन्मंगलमूर्त्तये नमः। श्रीगुरुचरणान्प्रतिप्रणामाः॥ प्रस्फुरन्मधुप
चुंबितपद्मापंकजातजनिपंकजिनीयं। बुध्यते किल जडापि च यस्मात्सार
णं तदिह धाम नमामः॥१॥ श्रीगुरून्पितरौ चापि नत्वा भास्करशर्मणा। वृत्तर
त्नाकरे सेतुर्यथामति विरच्यते॥२॥ ग्रंथारंभे यमर्थमधिकृत्य प्रवर्त्तते त
त्प्रयोजनमिति गौतमसूत्रोक्तेः सप्रयोजनं शिवप्रणामरूपं मंगलं निबध्न
न्ग्रंथस्य प्रयोजनं श्लोकत्रयेणाह। सुखसंतानेति। सुखं निर्विघ्नं ग्रंथस

बंध६

माप्तिजन्यं चिंतामणिरीत्या विघ्नध्वंसजन्यं वा तस्य संतानं परंपरा तत्सि
ध्यर्थं शंकरं नत्वेति संबंधः। एवं च सुखं ब्रह्मानंदः संतानं पुत्रपौत्रादि तयोः
सिद्धिरिति सुलक्षणव्याख्यानं प्रकृतानुपयोगादुपेक्ष्यं। अत्र श्लोके यमकं
शब्दालंकारः। शंकरशब्दस्य द्विः श्रुतेः। यदुक्तं। अर्थे सत्यर्थभिन्नानां
शब्दानां सा पुनः श्रुतिः। यमकमिति॥१॥ वेदार्थेति। वेदार्थाश्रयशैवशास्त्रा

णि च हृदूः। द्विजोत्तम इति। द्विजेषूत्तम इति विग्रहः॥३॥ लक्ष्येति। लक्ष्यं लक्षणं चेति द्वंद्वः।
ताभ्यां संयुक्तं युक्तं। यत्तु। मूलेलक्ष्यलक्षणयोरभिन्नत्वाद्द्वंद्वो न युक्त इति सुधाया
जं॥ तन्न। पदार्थयोरभेदेपि पदार्थतावच्छेदकभेदे द्वंद्वस्य प्रमाणप्रमेये सादौ बहुशो दर्श
नेन। पद्य। लक्ष्यं च तल्लक्षणं चेति कर्मधारयोस्तु। ईदृशं वृत्तकरं नाम छंदः। छंदः प्र
युक्ताद्दको ग्रंथः क्रियत इत्यर्थः॥ अथ स्वकर्तृत्वप्रामाण्यशंकां निरस्यति॥४॥ पिंगला
द्यैरिति। पिंगलः सूत्रकारः आदिना भाष्यकारादयः। लौकिकमिति। तेन चातुर्वर्ण्य
ध्ययनाधिकार इति भावः। अत्र हलायुधवृत्तिकारः। छंदस्त्रिविधं। गणमात्रा वर्ण
वशात्। तत्राद्यं चार्यादि। द्वितीयं वैतालीयादि। तृतीयं समान्यादीत्याह। तन्न। गण
तो। यो मात्राछंदस्येवांतर्भावादित्याशयेनाह। द्विधेति। मात्राछंद आर्यादि। वर्णछं
दस्यतेप्रभृति। एतेन मात्राछंदो गणछंद इति द्विधा विभागो निरूपितः॥४॥ इतमि
मता धृगणनायां प्रसिद्धा नामनुष्टुप्छंदसां श्लोकानामिति शेषः। एतेन सं
स्यान्यकर्तृकछंदोंतरप्रक्षेपो निराकृतः॥५॥ अथ द्वितीयाद्यध्यायगतवक्ष्य

नक्षणोपजीव्याः संज्ञाः उद्दिशति। म्यरसतेत्यादिना। म्। य्। र्। स्। त्। ज्। भ्।
न्। इति दश ता एकाक्षराः संज्ञाः धीश्रीस्त्री मित्यादि सूत्रानुरोधात्। अकारो
।तुक्च नि म्यरसतजभनलगसंमितमित्यादि दिवसुखमुखोच्चारार्थमिति
।आसां संज्ञानामीदृशाक्रमेव बीजं तु पश्चाद्वक्ष्यामः। समस्तमिति। संरव तथा
ग्रात्मकमित्यर्थः। त्रैलोक्यमिति। सर्वं विष्णुमयं जगदित्युक्तेः।६। अथैतासां सं
नामभिधेयमाह। सर्वगुरिति। सर्वे गवो गुरवो यस्मिन्स मोमसंज्ञः। मुखमा
लो लघुर्यस्मिन्नंतौ द्वौ गुरू यस्य यः। मध्यो लघुराद्यंतौ गुरू यस्य स रः। अंते गुरु
राद्यौ च लघू यस्य स सः। अंतो लघुराद्यौ गुरू यस्य स तः। मध्यो गुरुराद्यंतौ लघू य
स्य स जः। आद्यो गुरुरंतौ च लघू यस्य स भः। त्रिलघुर्नः इत्यष्टौ त्रिकास्त्रयो वर्णाः
परिमाणमेषां ते त्रिकाः। त्रिवर्णात्मका इति यावत्। गणा भवंति। म ऽऽऽ। य ।ऽऽ
र ऽ।ऽ स ।।ऽ त ऽऽ। ज ।ऽ। भ ऽ।। न ।।। यद्यपि सूत्रकृता। आर्यादिषु वक्ष्यमाणानां
चतुर्णामेकलः समुदायो गण इति त्वनीयाध्यायगतसूत्रेण गण इति संज्ञा कृताथ २

श्रीस्त्रीमित्यादिसूत्रगतमकारं च संज्ञात्वेनेत्यादि। वृत्तिग्रंथस्याप्येवमेव स्वारस्यं। त
थापि मादीनां वर्णसमुदायरूपत्वाद्गणत्वेन व्यवहारः। अत एवाचार्यपुङ्गवजितिसूत्रेन
जगणः कर्त्तव्य इति रत्निकारः। तथा लिपितो गणतोपि चे भामहोपीति दिक्। अत्रेदमव
धेयं। क्ष्मा वह्न्य निल खार्केंदु नाका मारुतः सुराः क्रमात्। श्रीवृद्धिनाशपथ्यश्रीरुक्कीर्त्या
युः फलानि च। दुष्टारसजायस्मात्तु नाशादीनां विनाशकाः। काव्यादौ न दातव्या इति
छंदोविदो जगुः। २। पदादैववशाद्यादियोगे गणाद्दुष्टफलो भवेत्। तद्दातद्दोषशांत्यर्थं शो
ध्यः स्यादपरो गणः। ३। तद्यथा। मनौ मित्रे भयौ भृत्यावुदासीनौ जतौ स्मृतौ। रसा
वरी नीचसंज्ञौ द्वौ वैतौ मनीषिभिः। ४। मित्रोदासीनभृत्येभ्यो मित्रभृत्यौ शुभौ म
तौ। अन्येभ्य इतरे नेष्टा इत्यूह्यं परिशेषतः। ५। गलाप्रसंगाद्वर्णानामपि शुद्धिः प्रका
श्यते। ऋलृ सजाः षठढणास्छफवामभरालवौ। बहलाः संयुताश्चान्ये काव्यादौ न शुभा
मताः। ६। अत एवोक्तं। अक्षरे परिशुद्धे तु नायको भूतिमिच्छति। इति। सर्वस्यैत
स्यापवादो भामहेनोक्तः। देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे नैव निं

घाः स्युर्लिखितोगणातेपि चेति। अत एव श्रियः पतिः श्रीमतीत्यादि महाकविप्रयोगाः
संगच्छंते। अथ द्वितीयाध्यायगतार्यादिलक्षणोपजीव्यानां पंचगणानां स्वरूपमाह।
द्वेयाइति। सर्वश्च मअंतश्च मध्यश्च आदिश्च सर्वांतमध्यादयः। गुरवो येषु ते तथो
क्ताः। द्वंद्वांते श्रूयमाणस्य गुरुपदस्य प्रत्येकमन्वयः। तेन सर्वगुरुरंतगुरुर्मध्यगु
रुरादिगुरुश्चेति चत्वारो गणाः। ननु तर्हि मसजभरूपा एवैते इति पुनः कथनं
व्यर्थं वै तेषामत आह। चतुःकला इति। चतुर्मात्राः एते न तु त्र्यक्षरात्मकाः मसजभाः।
तेन सर्वगुरुर्द्विगुरुरित्यर्थः। एकस्य गुरोर्द्विमात्रत्वात्। एवमंतगुरुरादौ द्वौ लघू।
मध्यगुरावाद्यंतयोः आदिगुरावंते ताववगंतव्यौ। अन्यथा चतुर्मात्रता न स्यात्। एवं च
तुरो गणानुक्त्वा पंचमं गणमाह। चतुर्लघ्विति। चत्वारो लघवो यस्मिन्स चतुर्ल
घुः। स पंचमो गणस्तेन सहिताः पंचगणाः। यथा। द्विगुरुः ऽऽ अंत ।।ऽ मध्य ।ऽ।
आदि ऽ।। चतुर्लघुरिति। एषामुपयोगः आर्यादिलक्षणे द्वितीयाध्याये भविष्यति॥

न लुप्तधातोर्व्यारव्यातं। सर्वत्रांते मध्ये आदौ च गुरुर्येषां त इति। तच्चिंत्यं। शेषो
बहुव्रीहिरिति पाणिनिसूत्रस्थेन शेषपदेन। त्रिकतस्तर्हि शेषग्रहणमित्यादि
महाभाष्यवार्त्तिकादिग्रंथेन च सह विरोधात्। अत एव क्वचित् त्रगुरित्यत्र त्रिग्रहणं
गवामयनमिति मीमांसकोक्तविग्रहेऽपि न म्रेडयः। अत्र सर्वे च ते आद्ये त्यादि
ग्रंथेन कर्मधारयं कुर्वतः सुलक्षणस्य तु महान्प्रमादः। सर्वगुरुगणस्यानुपपत्तेः।
किंच। आद्यंतपदयोर्वैयर्थ्याच्च। मात्राप्रस्तारक्रमविरोधादिति विशेषं स्फुटी
करिष्यामः। अथ गुरुलघुस्वरूपमाह। सानुस्वार इति। यथा तरुणं सर्षपं खा
दन्ननुस्वारांतोऽकारो गुरुः। श्रियः पतिरित्यादौ विसर्गांतः। युक्तपरः संयोगप
रः। यथा तरुणं सर्षपस्य ग्रसनात्ककाराकारः। चकारात् व्यंजनांतोऽपि। यथा। नतभ्रुवां मन्म
थविभ्रमो न वदिति। यत्तु भट्टाः। युक्तपर इति व्यंजनोपध्मानीयजिह्वामूली
यपराणामुपलक्षणमिति व्याचख्युस्तन्न व्यंजनानांश्चोपलक्षणमास्तां म्र।

जिह्वामूलीयोपध्मानीययोस्तु संयोगपरत्वे वास्तीति कथं तदिति चेत्। अयोगवाहानां शर्षु पसं
ख्यातत्वात् जिह्वामूलीयोपध्मानीययोर्हल्त्वे नकवर्गपवर्गयोरानंतर्येण संयुक्त
त्वात्। यथोक्तं। स्य वरट्सूत्रे महाभाष्यकृ — ता: हलोनंतराः संयोग इति संयोग
संज्ञेति। पृथगनुस्वारग्रहणं गोबलीवर्दन्यायेन। एवं विसर्गस्यापीति ध्येयं। एवं
ह्रस्वस्य गुरुत्वमुक्तं। दीर्घश्च गुरुः। तरुणंसर्षपशाकमित्यत्रैव शाकारात्पर आका
रः। वा पादांत इति। पादश्चेदसमाप्यः तदंत्यगुरोर्लघोर्गुरुत्वं वैकल्पिकं। तेन गु
रुत्वाज्जतौ तु वंशस्थमुदीरितं जराविति वंशस्थलक्षणं जगन्निवासो वसुदेवस
मनीत्यत्र संगतं भवति। अन्यथा सद्मनीतीकारस्य लघुत्वेन जगणांतत्वं स्या
त्। क्वचित्तु लघुनैव। तेन जौ समानिका ग्लौ चेमादौ समानिकादि लक्षणसमन्व
यः। विषमपादांत्यलघोस्त्वनुस्वारादिपरत्वं विना गुरुत्वं। अत एव। सकलमेकाव्य
प्रकाशकृतोक्तं। विकसितसहकारभारहारिपरिमलपुंजितद्विरेफ इति। अत्र
परिमलपदस्य ककारात्पूर्ववर्णस्य गुरुत्वार्थं प्रमुदितपाठा युक्ता इति। कवयस्तु विषम

दमाऽज्ञनमाभुप्रस्थितं निवसन गृह्णायेति माघादौ नाज्ञी नीकारस्य हेतिसंयोग
परस्यापि लघुतायां औचित्यात् । अन्यथा स्वागतानौ गोगिति सत्वासंगतेरिति दि
कू । सरस्वतीकंठाभरणकारस्तु यद्वा तीव्रप्रयत्नेन संयोगादेर्गौरवं । न छंदोभंग
मित्याकुस्तद्दोषापसरणायेत्याह । एतेन छंदोभंगभीत्या पूर्वो क्रमाघ श्लोके ह
दशाब्दमपनीय इति दुर्घटवृत्तिकारो नाम नादेयं । अत्यीति । अत्थे यो नुष्टुभि
ख्यातमित्यादौ प्रवृत्तानामिति शेषः । चतुर्थं शादिति । श्लोकस्येति शेषः । आर्या
दिषु वक्ष्यमाणायाय ते स्वरूपमाह । विच्छेदेति । यथा वक्ष्यति । षष्ठे द्वितीयलात्
इत्यादि । संज्ञांतरमाह । युक्समिति । युगिति समपादस्य संज्ञा । यथा । वक्ष्य
तेनुष्टुप्प्रकरणे । युजोर्जेनसरिलघ्नवर्तु इत्यादि । अयुगिति विषमपादस्य
संज्ञा । यथा तत्रैव । चपलावक्त्रमयुजो इत्यादि । चकारः समपर्यायो युग्मशब्दो
विषमपर्याय ओजशब्दश्च ज्ञेयः । यथा वक्ष्यति वैतालीयप्रकरणे । यद्वा समा
वोजयुग्मकावित्यादि । सममिति । यथा तत्रैवाध्याये वक्ष्यति । गुः श्रीरित्यादि ॥

पादांतस्यापि गुरोः स्थाने लघुं प्रयुंजते। दिवाकराद्रक्षति यो गुहास्विति आदि। अथ गुरोः
प्रस्तारे खवनेन संप्रत्ययमाह। वक्र इति। यथा। ऽ अन्यो गुरोरन्यो मात्रिको लघुर्ज्ञेयः स
ऋजुर्लेखो यथा। अथ गुरोरपि क्वचिल्लघुत्वमाह। पा. दांताविति। पादादौ यः सं
योगः सक्रमसंज्ञः तस्मिन्नुपरतः पूर्वस्य गुरोरपि वर्णस्य लघुता स्यात्। अस्येति।
लघुत्वस्येत्यर्थः। तरुणमिति। अत्राल्पव्ययेन सुंदरीति तृतीयपादांत्यरकारो श्रा
म्यतीति संयोगपरत्वाद्गुरुः स्यात् आर्यायास्तृतीयपादस्य द्वादशमात्रता न प्रकल्पते रखतस्त
स्य लघुत्वमुच्यते। यदुक्तं श्रुतबोधे। यस्याः प्रथमे पादे द्वादशमात्रास्तथा तृतीयेपि॥
अष्टादश द्वितीये चतुर्थे पंचदश सार्येति। वस्तुतस्तु सूत्रादिग्रंथपर्यालोचनेन आर्या
याः पादव्यवस्था न लभ्यते। अत एव वर्णपादांतावित्यवर्णस्येति पाठः क्वचित्पुस्तके
दृश्यते। युक्तश्चायं। स्वरान्तस्थोपहितो द्विरुच्यते संयोगादिः सक्रम इति वह्वृच
प्रातिशाख्यादौ वर्णपादांतावपि क्रमसंज्ञाया अभ्युपगमात्। कथं विसंजुत्तपराव
त्थो लहु होइ इति प्राकृतपैंगले सामान्यतः कुत्रापीत्यभिधानात्। प्राक्तनास्तिन्

उपर्द्धसमम् इति। यथा चतुर्थे वक्ष्यति। विषमे यदि सौ सलगा इत्यादि। अत्रद्भुतम
ध्यादीति। भेदा उक्तं व्याख्यानं निरस्तं। उपचित्रस्य भागे वीजाभावात्। विषमं चेति ।।
यथा पंचमे वक्ष्यति। मुखपादोऽष्टभि रित्यादि। एषां त्रयाणां स्वरूपं श्लोकत्रयेणाह।
अंघ्रयो यस्येत्यादिना। यस्य चत्वारः पादास्तुल्यास्तत्समं। यस्य प्रथमतृती
ययोः द्वितीयचतुर्थयोश्च पादयोः साम्यं तदर्द्धसमं। यस्य चत्वारोपि पादा विलक्ष
णास्तद्विषमम् इत्यर्थः। आरभ्येति। एकाक्षरमारभ्य षड्विंशाक्षरान्तमेकाक्षरवर्द्धितैः
पादैः समं वृत्तं तृतीयाध्याये प्रकुड्डयं ।। तदूर्ध्वम् इति। षड्विंशात्पूर्ध्वं चंडवृष्ट्यादी
ति। अत्रादिना व्यालजीमूतहय इति सुलक्षणो निबद्धिरत्या। अर्णार्णवव्यालास्योगनि
र्वीजत्वात्। समम् इति। ततस्त्रिभिः षड्भिः प्रकरणैरुपलक्षितानां गाथानां प्रकरणरूपं
शेषम् इत्यर्थः। एकाक्षरात्तु द्विषड्विंशात्यंतानां छंदसां क्रमेण संज्ञाः श्लोकत्रयेणाह।
उक्तेत्यादिना। इत्युक्तकारीति। द्वितीयेऽत्र वृत्तमुक्तास्सर्ववृत्तानां लक्षणं साम्प्रतं
तृतीयादौ वक्ष्ये। वक्ष्यामि। वर्त्तमानसामीप्ये वर्त्तमानवत्प्रत्ययः। इति श्रीमद् गिरिहोत्रि

कुलतिलकायमानश्रीमदापाजिभट्टसूनुभास्करविरचिते वृत्तरत्नाकरसेतौ प्रथमो-
ध्यायः॥१॥ श्रीमहादेवो जयति॥ अथ पद्यद्वये नार्यां लक्षयति। लक्ष्मैतदित्यादिना।
अत्र चतुर्मात्रा गणाः सप्त भवंति। एकेन गुरुणा द्वमस्थ नीचेन सहिताश्चैतत् आर्या
याः प्रथमेऽर्द्धे नियतं लक्ष्मलक्षणं ज्ञेयं। एवं सप्तगणानां चाविंशतिमात्राः २८ अष्ट
मस्थानीयगुरोस्तु द्वे मात्रे २ इति योजनात्रिंशन्मात्राः ३० वैशिष्ट्यमार्याप्रथमार्द्धल
क्षणं पर्यवसन्नं। तत्किं न विशेषेण मे साह। भवति नेहेति। इह प्रथमार्द्धे विषमे विषम
स्थाने प्रथमतृतीयपंचमसप्तमास्थ्वेषु द्विगुर्वादिर्मध्यगुरुरूपचतुर्मात्रता
या तो पि जो गणो न भवति। समे तु नियतः कुत हि नियतः स्यात् आह। षष्ठ इति॥
षण्णां पूरणः षष्ठः वा अथवा षष्ठो नघू देयो नश्च लघुश्च नलघू। नगणस्त्रिलघु
रेकतरो लघुश्चेति चतुर्लघुरूपो गणः षष्ठो देय इति यावत्। तथा च जगणलघ्व
न्यतर एव षष्ठ इति। नियमः फलितः। पथ्यात्रैव लक्षणसमन्वयः। लक्ष्मैत
ति द्विगुरुरूपश्चतुर्मात्र एको गणः। एवं तत्सत्र्यंतिद्वितीयः पूगणादयं तगुरुस्ताई

तीयः। गोपेइति द्विगुरुश्चतुर्थः। तावत्तवइत्यादिगुरुः पंचमः। तिनेहेति मध्यगुरुः
षष्ठः। विषमे इत्यंतगुरुः सप्तमः। तिसप्तगणा नाम ष्टाविंशतिमात्राः २८ मइति चां
तेगुरुरितितस्यद्विमात्रेः २ इतियोजनात्रिंशन्मात्राः ३० संति प्रथमार्द्धे। नास्ति च विषम
स्थानेजगणः। षष्ठस्त्वयं नेतिनेहेति। नचव्यंजनं चार्द्धमात्रिकं इत्युक्तेर्व्यंजनद्वयसं
योगस्यमात्रासंकलनात्तु श्चैरइत्यादौ मात्राधिक्यात्रिंशन्मात्राकृपलक्षणासंगति
रितिवाच्यं। अत्र मात्राणामेव गणत्वेन व्यंजनसंयोगानामतथात्वात्। नलघूवेत्यस्यो
दाहरणं। तुद्वितीयपद्यप्रथमार्द्धेज्ञेयं। अत्र षष्ठोयमिति षष्ठस्थानेजगणइतिसुधीना
मास्व्यानमनोदयं। प्रथमायाः षष्ठप्रथेलक्षणापत्तेः। पञ्च नलघूवेत्यत्र नगणयुक्तो
नलघुरितिसुह्लणआह। तन्न। नलघूइतिद्विवचनानुपपत्तेः। एवमार्यायाः पूर्वार्द्धल
क्षयित्वाद्वितीयेनपद्येनयतिनियममुत्तरार्द्धलक्षणंचाह। षष्ठोद्वितीयेलात्सरइति।
अत्रप्रथमेइत्यनुवर्त्तते। षष्ठस्थानेनेन्लेनगणयुक्तेलघौ चलुर्लघावितियाव
त्। रूतेसतिचलुर्लघुसंबंधीयोद्वितीयोलघुस्तस्मात्प्रथमेपूर्वस्मिन्नाघमल
घौसयतिविच्छेदंपदसमाप्तिरित्यर्थः। यथा त्रैव। षष्ठोद्वितीयलात्सरकेन्लेमुख

लार्द्धे सत्र षष्ठश्चतुर्लघुप्रयुक्ता यतिः सा यतीत्यत्र तु सप्तमलघुप्रयुक्ता । अत्र यद्यपि
जं परिहतुं तीरमणं ओपीत्यादाविवर्द्धितीपतती यावंत सुर्वादि गुरून देयादि विभिकाव्य
प्रकाशेऽभिधानात्कासरइतित्ततीय आदिगुरुर्नयुक्तस्तथापि तयोरेकस्थाने सुग
पत्प्रयोगानिषिद्धेन तु । यथा काव्ये यज्ञासे इत्यत्र पार्वक्ये नापी सदोषः । अथोत्तरार्द्धेय
तिभिन्नमाह । चरम इति । अंतिमेऽर्द्धे पंचमस्थाने न्केसति तस्य प्रथमलघोः पूर्वस्मि
न्नूच लुर्थगणांते यतिः । यथा । चरमेऽर्द्धे पंचमके तस्मादिहयस्यां ते । अथोत्तरार्द्धलक्ष
णमाह । इह भवति षष्ठो लइति । अर्योत्तरार्द्धे षष्ठगणस्थाने पञ्चएकोलघुरेव देयो
न तु चतुर्मात्रो गणः शेषं पूर्वार्द्धवत् । एवं हि पंचगणानां विंशतिमात्राः २० षष्ठगणस्था
नीयलघोरेका १ सप्तमगणस्य चतस्रः ४ अष्टमस्थानीयगुरोर्द्वे २ इति संयोजना
सप्तविंशतिमात्रा २७ वैशिष्ट्यं आर्योत्तरार्द्धलक्षणं पर्यवसन्नं । अस्ति चेदं चर
मेऽर्द्धेत्युत्तरार्द्धे षष्ठो यमित्यादि पूर्वपद्योत्तरार्द्धे चेति स्वयं संगमनीयं । भेदा आर्या
दिके तेषु भूयांसः संति यद्यपि तेषाप्यनुपपन्नत्वान्न ब्रुवे किल तानिह । मुख्या ७
यालक्षणं । अथ पथ्यार्यालक्षणमाह । त्रिष्विति । यस्य द्वयोरप्यर्द्धयोस्त्रिषु अं

शाकेषु च तुर्मीत्र गणेषु पादेषु विरामो ऽस्य तेसा पथ्येति। केवलं यथितस्तमार्या इति
वैलक्षण्यं यथा। त्रिषु अंशकेषु पादइ त्यस्यां तेयतिः पूर्वार्द्धे पथ्येति नाम तस्या इत्यत्रो
तरार्द्धे। अथ विपुला। उल्लंघ्येति। उल्लंघ्य गणत्रयमाद्यमिति गणत्रयमुल्लंघ्य दि
ममित्यत्र विरामः। एवमुत्तरार्द्धे पि सेयं विपुलाइति। प्रसिद्धौ। अथ चपला। उभ
येति। गुर्वोर्मध्यगतो जगणो यस्या द्वयोरप्यर्द्धयोर्द्वितीयचतुर्थौ स्याता सा चपला॥ आर्या।
यथा। पूर्वार्द्धे द्वयोर्जे इति। द्वितीयो जगणः। द्वितीय इति चतुर्थेपि। एवमुत्तरार्द्धे तिना
मेति द्वितीयो जगणः प्रकीर्तित इति चतुर्थश्च। अथ मुखचपला। आद्यमिति। य
स्या आद्यमर्द्धं चपलालक्षणविशिष्टं यात्वोषे उत्तरार्द्धं पूर्वं आलक्ष्मा। आर्यात्त
रार्द्धसामान्यलक्षणेन सप्तविंशतिमात्रारूपेण विशिष्टा सा मुखचपला। अ
न्वर्था चेयं संज्ञा। मुखे पूर्वार्द्धे चपलालक्षणवत्वात्। एवमुत्तरार्द्धे चपलालक्ष
णवत्वाज्जघनचपला या अपि। अत एवाह। प्रागिति। यस्याः प्रथमे ऽर्द्धे
आर्यापूर्वार्द्धलक्षणं प्रथमेतरे द्वितीये चपलालक्षणं सा जघनचपला॥

प्रथममितिरथस्मादिति बहुव्रीहिः। अथ गीतिः। आर्याप्रथमेति। यस्याः पूर्वार्द्धवत्
द्वितीयार्द्धलक्ष्मेतदित्यादि पूर्वार्द्धलक्षणं भवेत्तां पिंगलो गीतिमुक्तवान्। कथमपी
ति पूर्वोक्तषष्ठायं न लघूनेति पक्षयोरन्यतरपक्षेणापीत्यर्थः। यत्तु सुधायां षष्ठ
जगणचतुर्लघुगणान्यतमप्रकारेणेति व्याख्यातं तदशुद्धं। षष्ठजगणचतुर्ल
घुरूपयोर्द्वयोरेवैकस्यानिर्द्धारणीयत्वात्। अन्यतमशब्दो हि बहुविषयकनिर्द्धा
रणे प्रयुज्यते। यदुक्तं पस्पशायां कैयटेन। अन्यतरान्यतमशब्दावव्युत्पन्नौ
स्वभावाद्द्विबहुविषये निर्द्धारणे वर्त्तेते इति। अथोपगीतिः। आर्याद्वितीयेर्द्धइति। इ
ह भवति षष्ठो लः इत्यार्योत्तरार्द्धलक्षणं यस्या द्वयोरप्यर्द्धयोः स्यात्सोपगीतिः॥
३। अथोपगीतिः। आर्याशाकलेइति। यस्या अर्द्धद्वितयं द्वितीयमर्द्धं पूर्वार्द्धल
क्षणकं पूर्वार्द्धमुत्तरार्द्धलक्षणकमिति व्यत्ययेन रचितं सोद्गीतिः। तद्वदिति॥
पथ्यार्यावदिति भावः। यत्यंशेति। त्रिषंशकेष्वित्याद्युक्तसंयुक्ते इत्यर्थः॥ अथा

र्यागीतिः। आर्यापूर्वार्द्धमिति। त्रिंशन्मात्रारूपं पूर्वार्द्धं निधने तु ते एकेन गुरुणा युक्तं द्वा
त्रिंशन्मात्राविशिष्टपूर्वार्द्धं इति यावत्। यदीयं स्यात्। उत्तरार्द्धमपि निखिलं तद्वत् द्वा
त्रिंशन्मात्राविशिष्टमित्यर्थः। सार्यागीतिः। तथा चोक्तं सूत्रकारेण। अर्द्धे वसुगण आ
र्यागीतिरिति। अत्र सूत्रे अर्द्धे वसुगण इति च। प्रथमाद्विवचनांतं इति सुधाहावुक्तं।
तन्न। ई ऊ ए द्विवचनं प्रगृह्यमिति प्रगृह्यत्वात्प्रकृतिभावापत्त्या यादेशाद्यनापत्तेः।
तस्मादेतत्सूत्रे मिथ्यं वृत्तिकृता व्याख्यातं। आद्ये अर्द्धे द्वितीये चाष्टगणेस सार्यागीति।
एतेन पूर्वार्द्धे द्वात्रिंशन्मात्रा उत्तरार्द्धे त्वेकोनत्रिंशन्मात्रा आर्यागीती भवंतीति मन्य
मानाः सुल्हणादयोपि निराकृताः। मधुकरविटपानमितास्तरुपंक्तीर्बिभ्रतोस्य वि
टपानमिताः परिपाकपिशंगलतातरअसारो धम्मकास्तिपिशंगल्लतेति माघाकार्या
गीतिविरोधाच्च। इतिगीतिप्रकरणं। अथ वैतालीयं। षड्विषमे इति। वैतालीयछं
दसि विषमे पादे प्रथमतृतीयरूपे षट्कलाः षण्मात्रादेयाः तासामंते रलौ
रश्च लश्च रलौ। मध्यलघुरगणः। अन्यो लघुश्च। ततो गुरुश्चेति। समपादे द्वितीय
चतुर्थरूपे तु अष्टौ कला देयाः। तास्तु निरंतरा न स्युः। नो इति निषेधार्थः। अव्यवहिता

लघवो नेद्यारसर्थः। तासामष्टकलानामंते विषमपादवद्गणेन लघुरो गुरुश्चेदे
यो। अत्र आसु षट्सु षट्कलासु मध्ये सम कलासु मध्ये समाकला द्वितीयादिका पराश्रिता। तृतीयाद्याश्रिता न कर्त्तव्या। द्वितीयातृतीयाभ्यामेको गुरुर्न कर्त्तव्य इत्यर्थः।
एवं चतुर्थीपंचमीभ्यां षष्ठीसप्तमीभ्यां च तदिदं वैतालीयलक्षणं। अस्ति चेदमत्रैव
षड्विषमेऽष्टौ समे पादे षण्मात्रास्तासामंते ष्टौ समे इति रगणस्तदंते च कलाः इति लघु
गुरू। नास्ति च द्वितीयात् तृतीयाभ्यां चतुर्थीपंचमीभ्यां च मात्राभ्यामेको गुरुः किंतर्हि
प्रथमाद्वितीयाभ्यां पंचमीषष्ठीभ्यामस्ति। एवं तृतीयपादेपि द्रष्टव्यं। अथ द्वितीय
समपादे ताश्च समस्य पुरस्थ षष्टौ मात्राः संति तदंते नो निरमिति रगणास्तदंते राइति
लघुगुरू मात्रा मुख्या अष्टौ लघवो न संति किंतु मिश्रिताः नापि द्वितीयादिमात्रात् तृती
याद्याश्रितास्ति। एवं चतुर्थपादे प्यूहः। औपच्छंदसिकं। पर्यंत इति। अवसाने वि
षमपादे षण्मात्रास्तदंते रगणायगणौ समपादे ऽष्टौ मात्रास्तदंते रगणयगणौ

यत्र तदौपच्छन्दसिकं। तथैव शेषमिति। यद्यपि विषमपादांत्यलघोर्न गुरुत्वमिति शास्त्रोक्तं
तथापि कविसमयप्रसिद्ध्या रसादिकाव्यविषयं तन्मते तादृशविषयमिति भावः। अथा
पातलिका। आपातलिकेति। विषमे षण्मात्राः समे ष्टौ इत्यादि पूर्ववत्। इयांस्तु विशेषः।
तासां मंते भगणो द्वौ गुरू चेति। अन्यदिति। चकाराद्धंजनांतस्यापि ह्रस्वस्य गुरुतायाः शा
स्त्रोक्तत्वात्पूर्ववत्सत्ता द्रष्टव्या। अथ दक्षिणांतिका। तृतीयेति। यस्यैव वैतालीयस्य चतुर्षु पादेषु
द्वितीयो लघुस्तृतीयेन लघुना युक्तः स्यात्। प्रथमो लघुर्द्वितीयो गुरुरेव स्यादिति या
वत् सा दक्षिणांतिका। अथोदीच्यवृत्तिः। उदीच्येति। यत्रायुग्मयोर्विषमयोरेव पाद
योरग्रेण तृतीयेन युक्तश्चेद्द्वितीयो लघुः स्यात्तद्वैतालीयमुदीच्यसंज्ञं ज्ञेयं। अथ प्रा
च्यवृत्तिः। पूर्वेणेति। चतुर्थेन युक्तः पंचमो लघुः समपादयोः स्यात्तद्वैतालीयं प्राच्य
वृत्तिः। अथ प्रवृत्तकं। पदास्समानीति। पूर्वयोरुदीच्यवृत्तिप्राच्यवृत्त्योः सदृशौ ओज
युग्मकौ विषमसमपादौ विषमपाद उदीच्यवृत्तेः समपादः प्राच्यवृत्तेरिति यथासंख्ये
नान्वयः। क्रमश्च सामान्यादिति तात्पर्यान्यायादिति भावः। अथापरांतिका॥

अस्येति। प्रवृत्तकस्य समपादैः प्राच्यवृत्तिलक्षणैर्यो सर्वपादैरचितासापरांतिका। अथ चा
रुहासिनी। अयुग्मेति। यात्र वृत्तकस्य विषमपादैरुदीच्यवृत्तिलक्षणैरचितासा चारुहा
सिनी। इति वैतालीयं प्रकरणं। अथानुष्टुप्प्रकरणं। वक्रमिति। अनुष्टुभि अष्टाक्षरे छं
दसि। आद्यादक्षरादग्रे नगणो न देयो नापि सगणः किंतु मगणादयो देयाः किंच। अब्धे
श्चतुर्थादक्षरादग्रे यो यगणो देयः तदग्रे चान्य एको गणो देयः इदं नामानुष्टुब्वक्रमिति उच्य
ते। यथात्रैव। वरसाद्यादक्षरादग्रे वक्रं नाद्यादिति सर्वे[illegible]रु मगणोस्ति न तु नगणसगणौ
यो येति चतुर्थादक्षरादग्रे नसोस्येत्यस्ति यगणः एवं द्वितीयपादेपि द्रष्टव्यं। अथ वक्रस्य
भेदमाह। युजोरिति। युगिति समपादस्य संज्ञेत्युक्तमाद्ययुजोः समपादयोः सरि
त्पतेश्चतुर्थादग्रे जेन जगणप्रयोगेण विषमपादयो येगणेन च पथ्यावक्रं प्रकीर्तितं।
अवशिष्टं वक्रवत्। एवमन्येपि। ओजयोरिति। विषमपादयो वारिधेश्चतुर्थादक्ष
रादग्रे जेन जगणप्रयोगेण समपादयोर्यगणेन च विपरीतपथ्यावक्रं नाम। चपले
ति। विषमपादयोश्चतुर्थादक्षरादग्रे नगणप्रयोगे समपादयोर्यगणेन च चपला॰

पुष्पितानामपि निजरूपप्रतिपत्तिः परतएव संभवति। स्वमहिमदर्शनमत्वलोम्मुकुरतलेजायतएव

तसो वक्रा सेया। न्यो माग्निको ल्हजुः ॥७॥ पादादाविहवर्णस्य संयोगः क्रमसंज्ञकः।

पुरःस्थितेन तेनास्या छुयुतापिकमिकुरा ॥१०॥ इदमस्योदाहरणं। तरुणं स

र्षपशाकं नवौदनं पिछलानि चदधीनि। अल्पव्ययेन सुंदरि ग्राम्यजनो मिष्ट

मश्नाति ॥११॥ अथिभृतरसादीनां ज्ञेयाः संज्ञास्तु लोकतः। तेपादश्चतुर्थां

शो यति विच्छेदसंज्ञिता ॥१२॥ समसममर्द्धसमं विषमं चापि कुस्थानं स द्विर्निगद्यते। सममम

र्द्धसमं वृत्तं विषमं च तथापरं ॥१३॥ अंघ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः

। तच्छंदः शास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥१४॥ प्रथमांघ्रिसमो यस्य तृतीय

श्चरणो भवेत्। द्वितीयस्तुर्यवद्वृत्तं तदर्द्धसममुच्यते ॥१५॥ यस्य पादचतुष्केपि

लक्ष्म भिन्नं परस्परं। तदाहुर्विषमं वृत्तं छंदःशास्त्रविशारदाः ॥१६॥ आ

रभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः। पृथक्छंदो भवेत्पादैर्यावत्षड्विं

हा०

ऽशातिं गतं ।१७। तदूर्ध्वं चंडवृष्ट्यादिदंडकाः परिकीर्तिताः । शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥१८॥ उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका । गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च ॥१९॥ त्रिष्टुप् च जगती चैव तथातिजगती मता । शक्वरी सातिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते ॥२०॥ धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः । विकृतिः संकृतिश्चैव तथाभिकृतिरुत्कृतिः ॥२१॥ इत्युक्ताश्छंदसां संज्ञाः क्रमशो वच्मि सांप्रतं । लक्ष्म

इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकरे सर्ववृत्तानां नाम ... ॥२२॥

... संज्ञाध्यायः ॥१॥ लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः । षष्ठोयं नलघू वा प्रथमेऽर्द्धे नियतमार्यायाः ॥१॥ षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः । चरमेऽर्द्धे पंचमके तस्मादिह भवति षष्ठो

लुः ॥२॥ त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः । पथ्येति नाम तस्याः
प्रकीर्त्तितं नागराजेन ॥३॥ उल्लंघ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पा
दः । यस्यास्तां पिंगलनागो विपुलामिति समाख्याति ॥४॥ उभयोर्द्वयोर्जकारो
द्वितीयतुर्ययोर्गमध्यगो यस्याः । चपलेति नाम तस्याः प्रकीर्त्तितं नागराजेन ।
॥५॥ आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः । शेषे पूर्वजलक्ष्मा मुख
चपला सोदिता मुनिना ॥६॥ प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे च चपला
याः । लक्ष्माश्रयते सोक्ता विशुद्धधीभिर्जघनचपला ॥७॥ आर्याप्रथमदलो
क्तं यदि कथमपि लक्षणं भवेदुभयोः । दलयोः कृतयतिशोभां तां गीतिं
गीतवान् भुजंगेशः ॥८॥ ७ अथोपगीतिः । आर्याद्वितीयकेऽर्द्धे यदुदितं
[illegible] लक्षणं तत्स्यात् । यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥९॥ आर्या

करम०

ाकल्हितयं यस्य परं चितं भवेद्यस्याः । सोद्गीतिः किल कथिता तद्वत्सं
ज्ञाभेदसंयुक्ता ।१०। आर्यापूर्वार्द्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् ।
इतरत्तद्वन्निखिलं भवति यदीयमुदितेयमार्यागीतिः ।११। इति गीतिप्रक
रणं । षड्विषमेष्टौ समे कलास्ताश्च समे स्युर्नो निरंतराः । न समात्र पराश्रिता
कला वैतालीयेंते रलौ गुरुः ।१२। पर्यंते यौ तथैव शेषमौपच्छंदसिकं सुधी
भिरुक्तं । आपातलिका कथितेयं भाद्गुरुकावथ पूर्ववदन्यत् ।१३। तृतीय
युग्दक्षिणांतिका समस्तपादेषु द्वितीयलः । उदीच्यवृत्तिर्द्वितीयलः स
हाग्रेण भवेद्ययोः ।१४। पूर्वेण युतोथ पंचमः प्राच्यवृत्तिरुदितेति युग्म
योः । यदा समावोजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकं ।१५। अस्य युग्मरचि
तापरांतिका । अयुग्मयुक्चारुहासिनी । इति वैतालीयप्रकरणम् ॥ = ॥

अथानुष्टुप्प्रकरणं। वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योनुष्टुभि ख्यातं। युजोर्जेन
सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितं।१६। ओजयोर्जेन वारिधेस्तदेव विपरीतादि।
चपला। विक्रमयुजोर्नकारश्चेत्सयोराब्धेः।१७। यस्यां लः सप्तमो युग्मे सा यु
ग्मविपुलामता। सैतवस्यार्णवेपि। भेनाब्धितो भाद्विपुला।१८। इयम
न्या रश्चतुर्थात्। नोम्बुधेश्चेन्नविपुला। तोब्धेस्तत्पूर्वान्याभवेत्। इतिवक्त्र
प्रकरणं। द्विगुणितवसुलघुरचलधृतिरिति। मात्रासमकं नवमो ल्गांतं। जो
न्लावथांबुधेर्विश्लोकः। तद्युगलाद्वानवासिका स्यात्। बाणाष्टनवसु यदि ल
श्चित्रा। उपचित्रा नवमे परयुक्ते। अष्टाभ्यो गल्यापुपचित्रा। यदतीत
कृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितं। अनियतवृत्तपरिमाण
सहितं प्रथितं जगत्सु पादाकुलकं। वृत्तस्य ला विना वर्णैर्गा वर्णा गुरुभिस्त
था।

उरखो लैर्द्दलैर्नित्यं प्रमाणमिति निश्चितं। इति मात्रासमकप्रकरणं। शिखिगुणि

तदशलघुरचितमपगतलघुयुगलमपरमिदमखिलं। सगुरुशकल

कमपि सुपरिघटितललितपदविततिभवति शिखा। द्विनिमयविहितशक

लयुगलकलितपदविततिविरचितगुणनिकया॥ श्रुतिसुखरुचिरयमपि

जगति भजति शिखपगतवतिखञ्जा। अष्टावेर्द्धगाद्यभ्यस्ता यस्याः सा

नंगक्रीजेक्ता। द्दलमपरमपि नसुगुणितसलिलनिधिलघुकविरचित

पदविततिभवति त्रिगुणनवलघुरवसितिगुरुरिति दलयुगकृतत

नुरतिरुचिरा। इति द्वितीयोध्यायः॥ उक्तायां। गुः श्रीः। अत्युक्तायां।

गोः स्त्री। मध्यायां। मोनारी। रोमृगी। प्रतिष्ठायां। म्गौ चेत्कन्या। सुप्र

तिष्ठायां। भ्गौ गिति त्रीतिः। सती जगौ ग॥ गायत्र्यां। त्यौस्तनुमध्या॥

शशिवदनान्यौ। विद्युल्लेखा मो मः। ताम लतिका त्स्यौ। स्यान्मः सोमकु
लं। यमौ सोमराजी। स्याच्चुरौ स्त्रग्विणी। सौ चेद्वसुमती। उष्णिग्पि। मधुमति
ननगाः। कुमारललिता ज्सौ ग। सारंगा हंसमाला। म्सौ गः स्यान्मदलेखा। अ
नुष्टुभि। भ्गौ मिति चित्रपदा गः। मो मो गो गो विद्युन्माला। माणवकं भात्तलगाः।
म्नौ गौ हंसरुतमेतत्। नाराचकं तरौ लगौ। जौ सौ समानिका गलौ च। प्रमाणिका
जरौ लगौ। वितानमाभ्यां यदन्यत्। बृहत्यां। रान्नराविह हलमुखी। भुजगशि
शुसृता नौ मः। भद्रिका भवति रानरौ। ससजा सदरप्रकीर्तितं। पंक्त्यां। म्सौ
ग्गौ शुद्धविराडिदं मतं। म्नौ यो गो चित्पणवनामेदं। जौ रगौ मयूरसारिणी स्या
त्। भ्मौ सगयुक्तौ रुक्मवती यं। उक्ता हंसी मभनगसमा। ज्ञेया मत्तानाम भस
युक्ता। नरजगैर्भवेन्मनोरमा। चंपकमाला चेद्भ्मसा गः। सांऽपरभ्मौ
गुरु कोचेत्। त्रिष्टुभि। स्यादिंद्रवज्रा यदि तौ जगौ गः। उपेंद्रवज्रा जतजास्त
तो गौ।

नंतरोदीरितलक्ष्मभाजौपादौयदीयावुपजातयस्ताः। इत्थंकिलान्यास्वपिमिश्रि
तासुस्मरंतिजातिष्विदमेवनाम।एकत्रपादेचरणद्वयेवापादत्रयेवान्यतरःस्थित
श्चेत्। तयोरिहान्यत्रतदोहनीयाश्चतुर्दशोक्ताउपजातिभेदाः।नजजलगैर्गदि
तासुमुखी।दोधकवृत्तमिदंभभभाद्गौ।शालिन्युक्ताम्तौतगौगोब्धिलोकैः।वा
तोर्मीयंकथिताम्भौतगौगः।म्लौगःस्याद्भ्रमरविलसितं।रान्नराविहरथोद्धता
लगौ।स्वागतेतिरनभाद्गुरुयुग्मं।ननसगगुरुरचितावृत्ता।ननलगुरुभिश्चभ
द्रिका।श्येनिकारजौरलौगुरुर्यदा।मौक्तिकमालायदिभतनागौ।उपस्थितमिदं
ज्सौताद्गकारौ।पंचरसैःम्भौभतननगैःस्यात्।जगत्यां।चंद्रवर्त्मनिगदितंति
रनभसैः।जतौतुवंशस्थमुदीरितंजरौ।स्यादिंद्रवंशाततजैरसंयुतैः।।
इहतोटकमंबुधिसैःप्रथितं।द्रुतविलंबितमाहनभौभरौ।प्रमुदितवदना ५

मु १

भवेन्नौ चरौ। नयसहितौ न्यौ कुसुमविचित्रा। रसैर्जसजसा जलोद्धतगतिः। भुजं
गप्रयातं भवेद्यैश्चतुर्भिः। रैश्चतुर्भिर्युतास्त्रग्विणी संमता। भुवि भवेन्नभजरैः
प्रियंवदा। त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः। धीरैरभाणि ललिता नभौ जरौ।
प्रमिताक्षरा सजससैरुदिता। ननभरसहिता महितोज्ज्वला। पंचाश्वैश्छिन्ना वै
श्वदेवी ममौ ययौ। अब्ध्यष्टाभिर्जलधरमाला म्भौ स्मौ। इह नवमालिका नज
भयैः स्यात्। स्वरशरविरतिर्ननौ रौ प्रभा। भवति नजावथ मालती जरौ। नयुग
रयुगयुक् गौरी मता। अभिनवतामरसं नजजाद्यः। पंचमुनि म्भौ सा स्रयु
ताललना। ललितमभिहितं नौ म्रौ नामतः। द्रुतपदं नभनयरश्रुतं स्यात्। अति
जगत्यां। वेदै रंध्रैर्म्तौ यसगा मत्तमयूरं। यमौ रौ विख्याता चंचरीकावली गः।
न चतुर्ग्रहैरतिरुचिरा जभस्जगाः। लैरगरसयतिर्नौ जतौ गः क्षमा। सज
साजगौ भवति मंजुभाषिणी। ननतरगुरुभिश्चंद्रिका चतुर्भिः। म्नौ ज्रौ ग

स्त्रिदशयतिः प्रहर्षिणीयं। शार्क्क्यो। म्तौ न्सौ गौ वक्षग्रहविरतिरसंबाधा। नन
रसलघुगैः स्वरैरपराजिता। ननभनलघुगैः प्रहरणकलिता। उ॰ त्नाव संत
तिलका तभजाजगौगः। सिंहोन्नतं तदुदितं मुनिकश्यपेन। उद्धर्षिणीयमुदि
ता मुनिसैतवेन। रामेणसेयमुदिता मधुमाधवीति। रं॰ द्वन्द्वनाभजसनैः स
गुरुयुग्मैः। छं॰ ससच्छिद्दलीलाम्सौ म्नौ गौ चरणेचेत्। अतिशर्क्करियां मू
र्छितहतलयलचुरथभित्तिशाखाकला। स्वगिति भवतिरसनवकयतिरियं।
वसुहयमतिरिह मणिगुणनिकरः। ननमयययुतेयं मालिनी भोगिलोकैः।
भवति नजौ भजौ रसहितौ भभद्रकं। सजना न यौ स्वरदयति विद्यमेला। म्तौ म्यौ
यां तौ भवेतां सललाष्टर्षिभिश्चन्द्रलेखा। अष्ट्यां। म्नौ त्रिन गा स्वरा हयम्रषभ
गजविलसितं। नजभजरैः सदा भवति वाणिनी गयुक्तैः। लघुर्गुरुर्निरंतरं
यदासपञ्चचामरं। पंचमकारयुताखगतिर्यदि चांतगुरुः। अत्यष्ट्यां॥

रसैरुद्रैश्छिन्नायमनसभलागःशिखरिणी। जसौजसयलावसुग्रहयति
श्चपृथ्वीगुरुः। दिग्मुनिवंशपत्रपतितंनभरनभनलगैः। रसयुगहयैर्न्सौ
म्रौस्लौगोयदाहरिणीतदा। मंदाक्रांताजलधिषडगैर्म्भौनतौताद्गुरूचेत्। हयर
श्मिभिर्न्जौभजजलागुरुनर्कुटकं। मुनिगुहकार्णवैःकृतयतिर्वदकोकिलं।
ध्वस्तं। स्याद्भूतर्त्वश्वैःकुसुमितलतावेल्लितामतौनयौयौ। मात्सौजोभरसंयु
तोकश्विवाणैर्हरिणप्लुतं। यदिनयुगलंततोवहरफैर्महामालिका। पंचभकार
रुताश्वगतिर्यतिनिरता। अतिधृत्यां। नयुगललघुगुरूनिरंतरंयत्रासा
चचामरः। रसर्त्वश्वैर्यम्न्सौररगुरुयुतामेघविस्फूर्जितास्यात्। सूर्याश्वैर्मस
जस्तताःसगुरवःसैशार्दूलविक्रीडितं। कृत्यां। ज्ञेयासप्ताश्वषड्भिर्मरभनय
युताभ्लौगैःसुवदना। चीरजौगलौभवेदिहवृत्तनलक्षणेनवृत्तंनाम। प्रकृत्यां।
म्रभ्नैर्यानांत्रयेणत्रिमुनियतियुतास्रग्धराकीर्तितेयं। आकृत्यां। भ्रौनरनार

नावथ गुरू केविरमं इह भद्रकमिदं ॥ विकृत्यां ॥ यदि इह नजौ भजौ ज भ लगास्तदश्वललितं हरार्कयतिमत् ॥ मत्ताक्रीडा मौ त्नौ नौ नल्गिति संचतिवसुशरदशाय तियुता ॥ संकृत्यां ॥ भृत मुनीनैर्यतिरिह भ त नाः स्भौ भ नयास्त्वय यदि भवति तन्वी ॥ अतिकृत्यां ॥ क्रौंचपदा भ्मौ स्भौ ननना न्गाविषुशरवसुमुनिविरतिरिह भवेत् ॥ उत्कृत्यां ॥ वस्वीशाश्वैश्छेदोपेतं मम तनयुगनरसलगैर्भुजंगविजृंभितं ॥ मो नाः षट् सगगिति यदि इह नवरसशरयतिमुतमपवाहाख्यं ॥ यदि इह नयुगलं ततः सप्तरेफास्तदा चंडवृष्टिप्रयातो भवेद्दंडकः ॥ प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशंखादयः ॥ प्रचितकसमभिधो धीरधीभिः स्मृतो दंडको नद्वयादुत्तरैः सप्तभिर्यैः ॥ इति तृतीयोध्यायः ॥३॥ विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकावुपचित्रं ॥ भत्रयमोजगतं गुरुणी चेद्युजि च नजौ ज्यौ युतो द्रुतमध्या ॥ सयुगात्सगुरू विषमे चेद्भाविह वेगवती युजि भाद्गौ ॥ ओजे नपरौ जरौ गुरुश्चेन्म्सौ ज्गौ भद्रविराड्भवेदनोजे ॥ असमे सजौ सगुरुयुक्तौ केतु ७

मतीसमेभरनगाद्गुः॥ आख्यानकी तौ जगुरू ग ओजे जतावनोजे जगुरू गुरू चेत् ॥ जतौ जगौ गो विषमे समे चेत्तौ जौ गगौ वा विपरीतपूर्वा। सयुगात्सलघु विषमे गुरू युजि नभौ नरकौ हरिणप्लुता। अयुजि ननरलागुरुः समे ज्जमपरवक्त्रमिदं ततो जरौ। अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा। वक्त्रस्य परवक्त्रास्यं वैतालीयं विपश्चितः। पुष्पिताग्राभिधं केचिदौपच्छंदसिकं तथा। विषमे ससजा गुरू समे चेत्सभरा यश्च वसंतमालिका सा। स्यादयुग्मके रजौ रलौ समे चेत्तजरौ जरौ गुरुर्यवा सरामतीयं। इति चतुर्थोऽध्यायः॥४॥ मुखपादोऽष्टभिर्वर्णैः परे स्युर्मकरालयैः क्रमाद्वृद्धैः सततं यस्य विचित्रैः सोऽयं तदुदितमम लमतिभिः पदचतुरूर्ध्वाभिधं वृत्तं॥ प्रथममुदितवृत्ते विषमचरणभाजि गुरुकयुगलनिधन इह आपाललघुकविरचितपदमिति तिर्यदि भवति पीडः॥ प्रथममितरचरणसमुत्थं मध्य यति सप्त पदि लक्ष्म। इतरदितरगदितमपि यदि च। चरणयुगलमविकृतमपरमिति कलिकासा।

द्विगुरुयुतसकलचरणां तामुच्चरणागतमनुभवतित्तृतीयचरणमिह हि लक्ष्मप्रभूत
मखिलमपि यदि समनुभवति लवली सा। प्रथममधिवसति यदि तुर्ये। चरमचरण
पदमवसितिगुरुयुग्मं। अखिलमपरमुपरिमितिललितपदयुक्तात् द्विसमस्त
धारा। इतिपदचतुरूर्ध्वप्रकरणं। सजसादिमे सलघुकौ च नसजगुरुकैरथोद्गता॥
त्र्यंघ्रिगतभनजलागता सजसा जगौ चरणमेकतः पठेत्। चरणत्रयं व्रजति लक्ष्मय
दि सकलमुद्गतागतं। नौ भगौ भवति सौरभकं चरणो यदीह भवस्तृतीयके। नयुगं
सकारयुगलं च भवति चरणे तृतीयके। तदुदितमुरुमतिभिर्ललितं यदि शेष
मस्य खलु पूर्वतुल्यकं। इत्युद्गताप्रकरणं। म्सौ ज्गौ गोऽथ प्रथमांघ्रिरेकतः पथ्य
गन्यत्। त्रितयं सनजरगास्ततो नजौ सः। त्रिनपरिकलिता जयौ प्रचुपितमिद
मुपस्थितपूर्वं। नौ पादे यत्तृतीयके सनौ नसयुक्तौ। प्रथमांघ्रि रुतयतिस्तु
वर्द्धमानं। त्रितयमपरमपि पूर्वसदृशमिह भवति। प्रततमतिभिरिह गदितं लघु
वृत्तं। अस्मिन्नेव तृतीयके यदा तजराः स्युः प्रथमे च विरतिरोष्ठभंगुर्वतिलघु

गतिं गतं।१७। तदूर्ध्वं चंडवृष्ट्या।दिदंडकाः परिकीर्तिताः। शेषं गाथास्त्रिभिः
षड्भिश्चरणैश्चोपलक्षिताः।१८। उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुप्र
तिष्ठिका। गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च।१९। त्रिष्टुप् च जगती चैव
तथातिजगती मता। शक्वरी सातिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते।२०। धृ
तिश्चातिधृतिश्चैव धृतिः प्रकृतिराकृतिः। विकृतिः संकृतिश्चैव तथाति
कृतिरुत्कृतिः।२१। इत्युक्ताश्छंदसां संज्ञाः क्रमशो वच्मि सांप्रतं। लक्ष
णं सर्ववृत्तानां मात्रावृत्तानुपूर्वशः।२२। इति श्रीभट्टकेदारविरचिते वृत्तर
त्नाकरे संज्ञाध्यायः।१। लक्ष्मैतत्सप्तगणा गोपेता भवति नेह विषमे जः।
षष्ठोऽयं नलघू वा प्रथमेऽर्द्धे नियतमार्यायाः।१। षष्ठे द्वितीयलात्परके न्ले
मुखलाच्च सयतिपदनियमः। चरमेऽर्द्धे पंचमके तस्मादिह भवति षष्ठो।

पुंसां नामपि निजरूपकृतिपत्तिः परतरवसंभवंति। त्वमहिमं दर्शी नम हणोमु कुरतलजायत प
तसो वक्रा सेया न्योमात्रिको लघुः ॥१॥ पादादा विहवर्णस्य संयोगः क्रमसंज्ञकः।
पुरः स्थितेनतेनस्या छघुतापि कचिद्गुरोः ॥१०॥ हंदमस्योदाहरणे। तरुणं स
र्षपशाकं नवौदनं पिछला निचरभीनि। जल्पयेयन सुंदरि ग्राम्यजनो मिष्
टमश्नाति ॥११॥ अथ विभ्रतरसादीनां ज्ञेयाः संज्ञास्तु लोकतः। तेप पादश्चतुर्थां
शो यति विछेद संज्ञिता ॥१२॥ वृत्तसमं विषमंचार्धसमं स च्छिन्न गद्यते। सम
र्धसमं वृत्तं विषमं च तथापरं ॥१३॥ अंघ्रयो यस्य चत्वारस्तुल्य लक्षण लक्षिताः
। तच्छंदः शास्त्रतत्वज्ञाः समं वृत्तं प्रचक्षते ॥१४॥ प्रथमांघ्रिसमो यस्य तृतीय
श्चरणो भवेत्। द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते ॥१५॥ यस्य पादचतुष्केपि
लक्ष्म भिन्नं परस्परं। तदाहुर्विषमं वृत्तं छंदः शास्त्रविशारदाः ॥१६॥ आ
रभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः। पृथक् छंदो भवेत्पादैर्यावत्षड्विं
शं

दुविराट्पुरःस्थितं। त्रितयमपरमपि यदि पूर्वसमं स्यात्। इत्युपस्थितप्रचुपितप्रक
रणं। विषमाक्षरपादं वा पादैरसमं दशधर्मवत्। यच्छंदो नोक्तमत्र गाथेति तत्सूरि
भिः प्रोक्तं। दश धर्मं न जानंति धृतराष्ट्र निबोध तान्। मत्तः प्रमत्त उन्मत्तः श्रांतः क्रुद्धो
बुभुक्षितः। त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश। इति पंचमोध्यायः ५। प्रस्तारो
नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया। संख्यानमध्वयोगश्च षडेते प्रत्ययाः स्मृताः। पादे
सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः। यथोपरि तथा शेषं भूयः कुर्यादमुं विधिं। ऊनेद
द्या गुरून् देयात्सर्वे लघुर्भवेत्। प्रस्तारोयं समाख्यातश्छंदोविचितिवेदिभिः। न
ष्टस्य यो भवेदंकस्तस्यार्द्धेऽर्द्धे समे च लः। विषमे चैकमाधाय तदर्द्धेऽर्द्धे गुरुर्भवेत्। उद्दि
ष्टं द्विगुणानाद्यादुपर्यंकान्समालिखेत्। लघुस्था ये तु तत्रांकास्तैः सैकैर्मिश्रितै
र्भवेत्। वर्णान्वृत्तभवान्सैकानौत्तराधर्यतः स्थितान्। एकादिक्रमतश्चैता
नुपर्युपरि विन्यसेत्। उपांत्यतो निवर्त्तेत त्यजन्नेकैकमूर्ध्वतः। उपर्याद्याद्गुरोरे

पुष्पितानामपिनिजरूपज्ञप्तिप[illegible] परत[illegible]

वमेकद्व्यादिलगक्रिया। गलक्रियांकसंदेहेभवेत्संख्याविमिश्रिते। उद्दिष्टांकसमा
हारः सैकोवाजनयेदिमां। संख्यैवद्विगुणैकोनासद्भिरध्वाप्रकीर्त्तितः। वर्त्त
स्यांगुलिकीव्याप्तिमधः कुर्यात्तथांगुलिं। वंशेभूत्कश्यपस्यप्रकटगुणगणः
शैवसिद्धांतवेत्ताविप्रः पव्येकनामाविमलतरमतिर्वेदशास्त्रार्थवेत्ता। केदारः
स्तस्यसूनुः शिवचरणयुगाराधनैकाग्रचित्तश्छंदस्तेनाभिरामंप्रविरचि
तमिदंवृत्तरत्नाकराख्यं॥१॥ इतिश्रीभट्टकेदारविरचितेवृत्तकरेछंदसिषष्ठोऽ
ध्यायः॥६॥ शाके१६८९ सर्वजित्संवत्सरेवैशाखसितद्वितीयायांगुरौज
गन्नाथभट्टात्मजशंकरभट्टगौतमगोत्रेणलिखितमिदंवृत्तरत्नाकराख्यं
छंदः पुस्तकम्॥ श्रीगंगाधरोजयति॥ ॥ छ॥

वक्त्रं नाम। अथ युग्मविपुला। यस्यामिति। समपादयोर्यस्यां सप्तमो लघुः स्या
च्छेषं वक्त्रवत्सा युग्मविपुला नाम। यद्यपीदं युजोर्जिसादिपथ्यावक्त्रेऽप्युक्तं तथा
प्युपधेयसंकरत्वाददोषः। एवं पिंगलमतेन विपुलोक्ता। अथ सैतवमतेनाह। से
तवस्येति। चतुर्ष्वपि यत्र सप्तमो लघुः सा विपुलेति सैतवमतमित्यर्थः। ये चतुर्थाज्
गणेनैव सैतवविपुलामाहुस्तेषां मते किं मानमिति न विद्मः। तस्मात्सा युग्मविपुला
मते सैव तत्र जभनान्यतमेन गणेन चतुर्षु पादेषु लघुः सप्तमो लघुः सप्तमो सेति सैतवविपुलेति नि
र्णयः। यथा मामके लक्षणं। स्यात्सप्तमो यत्र लघुश्चतुर्षु चरणेषु सा। विपुलोक्तासु
मतिभिः सैतवस्य मतेन तु। इति। अथ विपुलाभेदानाह। भेनेति। चतुर्थचरणेषु
चतुर्थाद्भगणप्रयोगेण विपुला स्यात्। अत एकैकेनैव चरणेनेयं लक्षिता। यत्तु सुल
पानौ। विषमपादयोर्भगणप्रयोगेण भविपुलेति। तन्न। भ्रौ न्तौ न्वेति सामान्यत
श्चतुर्थाद्भगणेन भविपुलायाः सूत्रकारेण लक्षितत्वाद्विषमपादयोरित्यत्र
मानाभावात्। यदपि म्रौ न्तौ चेत्यत्र चपलायुजोरिति सूत्राद्युग्मग्रहणमनुवर्तते

इतिरे[illegible]कारेपा[illegible]। तद्दर्शि[illegible]। सर्वतः सेतेवर्स्येति सूत्रात्सन्निहितस्य सर्व
पादस्यैवानुवृत्तेर्युक्तत्वात्। विपुलायुग्लः सप्तम इति युग्ग्रहणेन व्यवहि
तपदानुवृत्तिर्नास्तीति सूत्रकृता ज्ञापितत्वाच्च। एतेन च प

वाक्य

त्ति:

वृत्तरत्नाकराख्यछंदःप्रारंभपत्रमिदम्

॥श्रीगणपतये नमः॥ सुखसंतानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितं। गौरीविनायकोपे
तं शंकरं लोकशंकरं १ वेदार्थशैवशास्त्रज्ञः पव्येकोभूद्द्विजोत्तमः। तस्य पुत्रो
स्ति केदारः शिवपादार्चने रतः।२। तेनेदं क्रियते छंदो लक्ष्यलक्षणसंयुतं। वृत्तरत्ना
करं नाम बालानां सुखसिद्धये।३। पिंगलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा॥
मात्रावर्णविभेदेन छंदस्तदिह कथ्यते।४। षडध्यायनिबद्धस्य छंदसोस्य परिस्फु
टं। प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतं।५। म्यरस्तजभ्नगैर्लांतैरेभिर्दशभि
रक्षरैः। समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना।६। सर्वगुर्मो मुखांतलौ
यरावंतगलौ सतौ। ग्मध्याद्यौ ज्भौ त्रिलो नो ष्टो भवंत्यत्र गणास्त्रिकाः।७
ज्ञेयाः सर्वांतमध्यादि गुरवोत्र चतुःकलाः। गणाश्चतुर्लघूपेताः पंचार्या
दिषु संस्थिताः।८। सानुस्वारो विसर्गांतो दीर्घो युक्तपरश्च यः। वापादां

॥ श्रीगणपतये नमः ॥ श्रीगुरुभ्यो नमः । ॐ ऐदंपर्येण वेदांता यद्ब्रुवंति प
रं पदं । तदहं ब्रह्म निर्भेदं सत्यादिपदलक्षितं ॥१॥ मुमुक्षुजनानुजिघृक्ष
या वाक्यवृत्तिसंज्ञितं प्रकरणं प्रारभमाणो विघ्नोपप्लवोपशमनादिप्रयोजन
प्रसिद्ध्ये परदेवताप्रणामरूपं मंगलाचरणं मुखतः संपादयन् प्रकरण
प्रारंभापेक्षितमनुबंधत्रयं च विषयसंबंधप्रयोजनलक्षणं संक्षिप्य
प्रतिपत्तिसौकर्यार्थं कथयति । सर्गेति । तत्र श्रीवल्लभं नमामीति सं

ॐ । सर्गस्थितिप्रलयहेतुमचिंत्यशक्तिं विश्वेश्वरं विदितविश्वमनंतमूर्तिं ।
निर्मुक्तबंधनमपारसुखांबुराशिं श्रीवल्लभं विमलबोधघनं नमामि ॥१॥

का० बध्यते । श्रियो विद्याशक्तेर्वल्लभस्तदाधारः परमात्मानं प्रति वाङ्मनःकायप्रणि
धानेन प्रह्वीभूतोस्मीत्यर्थः । तस्य तटस्थलक्षणमाह । सर्गस्थितिप्रलयहेतुमिति ॥

वाक्य
व
१

विश्वेश्वरमित्यादिवाक्यविशेषणविश्वस्येतिविवक्षितं। ननु कुतो कुतो जगतो निमि-
त्तत्वमुपादानत्वं च परस्य कूटस्थमास्थातुं शक्यमित्याशंक्यानाद्यनिर्वाच्या-
विद्याशक्तिवशादित्याशयेनाह। अचिंत्यशक्तिमिति। न च तन्नियमना-
समर्थस्य तदीयस्थितिहेतुत्वमिति विवक्षितत्वात्सर्वनियंतृत्वं सुगिरं ते। वि-
श्वेश्वरमिति। न च तत्परिज्ञानमंतरेण तन्नियंतृत्वं सुष्ठु वा शक्यतेऽतः स-
मिप्रायेणोक्तं विदितविश्वमिति। सर्वोपादानत्वप्रयुक्तं सर्वात्मत्वमाह। अनंतमू-
र्तिमिति। अथवा तटस्थलक्षणमुक्त्वा स्वरूपलक्षणमाह। अनंतेत्यादिना।
तत्र देशतः कालतो वस्तुतश्चानंतापरिच्छेदरहिता मूर्तिः स्वभावो यस्येति बु-
हत्तिमाश्रित्याखंडैकरसत्वमुक्तं। निर्मुक्तबंधनमित्यनेन निष्प्रपंचत्वं प्रद-
र्शितं। अपारसुखांबुराशिमित्यनेन परमानंदतोक्ता। विमलबोधघनमित्य-
नेन कूटस्थदृष्टिस्वभावतोपदिष्टा। सर्गस्थितिप्रलयहेतुमित्यारभ्यानंतमूर्ति-

१

मितं तेनाज्ञातः परमात्मा शास्त्रप्रतिपाद्यस्तद्वीयस्य प्रकरणस्यापि विषयः
सूचितः ॥ तेन संबंधोपि परमात्मप्रकरणयो विषयविषयिभावो बोधितः ॥ नि
र्मुक्तबंधनमित्यादिविशेषणद्वयेन सर्वानर्थनिवृत्तिरनतिशयानंदावाप्तिश्च
तिप्रयोजनमुक्तं विमलेत्यादिविशेषणेन तु प्रयोजनस्याप्रतिपन्नत्वंप्र
सुक्तमिति विवेक्तव्यं ॥१॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ इति श्रु

यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं परिकल्पितं च ॥ इत्थं विजानामि
सदात्मरूपं तस्यांघ्रिपद्मं प्रणतोस्मि नित्यम् ॥२॥ श्रीशिवः ॥

तेरिष्टदेवताभक्तिवद्गुरुभक्तेरपि विद्याप्राप्तावंतरंगसाधनत्वमस्ती
ति शिष्याशिक्षार्थं विशिष्टगुणसंकीर्तनपूर्वकं गुरुचरणसरोजं प्र
णमति । यस्येति । नित्यमिति भक्तिश्रद्धयोरेकोपवर्णनम् ॥२॥ ॥

...दानीं सुखप्रतिपत्तये शिष्याचार्योक्तिप्रत्युक्तिव्याजेन प्रकरणमवतारयन्नधिकारिणं साधनचतुष्टयविशिष्टमनूद्य तदीयं प्रश्नं प्रदर्शयति। तापत्रयेति। आध्यात्मिकं ज्वरादिकृतमाधिभौतिकं व्याघ्रादिकृतमाधिदैविकं चाति वातादिप्रसूतं तापत्रयमुच्यते। कश्चिदित्यधिकारिणो दुर्लभता विधीयते। शमादिसाधनैरित्यादिशब्देन दमोपरमतितिक्षासमाधानश्रद्धा गृह्यन्ते।३। उक्तानामनुक्तो

तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानसः। शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति।३। अनायासेन येनास्मान्मुच्येयं भवबंधनात्। तन्मे संक्षिप्य भगवन्केवलं वद।४। श्रीशिवः॥

सद्‌

कृपया ३

पलक्षणत्वादधिकारिणि साधनचतुष्टयवति प्रष्टरि सिद्धे तदीयं प्रश्नं प्रकटयति अनायासेनेति। येन साधनेनाप्रयत्नलभ्येनानुभवसिद्धादनर्थराशेर्मम विमोक्षो भवति। तन्मुक्तिसाधनमपरोक्षं कथयेनीति सूत्रार्थः। अंगैरुपांगैश्चोपबृंहितं मुक्तिसाधनमन्यत्र प्रपंचितमिस्यातिविस्तराक्याह। संक्षिप्येति। आचार्यं प्रत्याययन्निव कृपयेति तस्य शक्तिं व्यनक्ति। भगवन्निति। प्रत्युपकारानिरपेक्षतया दीनजनानुजिघृक्षया कृपाभिलक्ष्यते। शिष्यं प्रत्याह यतो गुरोरनुग्रहातिरिक्तादतिरिक्तं नास्ति फलमिति विवक्षित्वोक्तं केवलमिति॥४॥=॥ २

वक्ष्यमाणे स्वसमाधाने श्रोतृबुद्धेः सुखप्रवेशार्थं प्रवक्तारं प्रशंसति । साध्वीति । प्रले-
भनमात्रेण्यादितिमा प्रबुद्धिरस्यत्रिन्ने साह । वदामीति । न च मुक्तिसाधनं परो-
क्षत्वेनोच्यते । किंतु तज्जिज्ञासितमिदमित्यपरोक्षं वदामीत्याह । इदमिति । ए-
काग्रचेतसा श्रुतमेतत् । त्यातु वाक्यमन्येन श्रुतमपि दुर्ज्ञानमित्याह । सावधानमतिरि-
एवं प्रातनिकोक्तं मुक्तिसाधनं सप्रमाणं सविषयमुपन्यस्यति । तत्त्वमसीति ॥६॥

साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते । इदं तदिति विस्पष्टं सावधान-
मतिः शृणु ।५। तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः । तादात्म्यविष-
यं ज्ञानं तदिदं मुक्तिसाधनं ।६। को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः ।
तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत् ।७। श्रीभ्रुवः ।

तत्र प्रश्नचतुष्टयमुत्थापयति । कोजीव इति । जीवो देहादीनामन्यतमो वा पर-
श्चात्मा सप्रपंचो निष्प्रपंचो वा । तयोश्च तादात्म्यं तथैव स्थितं यथा अन्यथा स्थि-
तयोर्वा । वाक्यं च तत्तादात्म्यं पदयोर्मुख्यवृत्त्या वा लक्षणया वा कथं प्रतिपादयती

प्रश्नचतुष्टयस्योत्तरमाह। अत्रेति। को जीव इति प्रश्नस्य प्रतिवचनं हृद्योयति। कोन्य इति। जीवो नाम देहादिव्यतिरिक्तस्तत्र साक्षी। त्वंपदार्थो योयं विज्ञानमयः प्राणेष्वित्यादिश्रुतिसिद्धो न तु कश्चित्ततोन्यो देहादिर्जीवस्तस्य हृदयस्य स्फुटत्वानुपपत्तेर्वक्ष्यमाणत्वादित्यर्थः। योहं जीवस्तदर्थः सोहं ब्रह्मणाभिन्नोऽभिन्नो वेति पृच्छतीत्याह। यस्त्वमिति। मां प्रति यस्त्वमहं कः स्यामिति पृच्छसि स त्वं ब्रह्मैवासि

अत्र ब्रूमः समाधानं कोन्यो जीवस्त्वमेव हि। यस्त्वं पृच्छसि मां कोहं ब्रह्मैवास्मि न संशयः ॥८॥ पदार्थमेव जानामि नाद्यापि भगवन्स्फुटम्।
अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद ॥९॥ श्रीशंकरः ॥३॥

न लसन्निलैरस्मै वाक्यार्थे कश्चित्प्रतिबन्धोस्तीति स्वर्थः। पदार्थज्ञानस्य वाक्यार्थज्ञानहेतुत्वात् पदार्थस्य च त्वस्य प्रमितिर्जातत्वान्न वाक्यार्थप्रतिपत्तिर्मम संभवतीति शंकते। पदार्थमेवेति। आपातेन पदार्थप्रतिपत्तावपि यथावत्प्रतिपत्त्यभावेन वाक्यार्थधीः। दृश्यमिति प्रसक्तं स्फुटमिति ॥९॥८॥

पदार्थज्ञानस्य वाक्यार्थज्ञानहेतुत्वमुक्तमंगीकरोति। सत्यमिति। अविगीतमंगी
कृतमर्थमनुवदति। हेतुरिति। १०। तर्हि पदार्थव्याख्यानवद्वा वाक्यार्थो व्याख्या
यतामित्याशंक्याह। अंतःकरणेति। साक्षाद्दिदृष्टप्रतिकर्तृत्वं साक्षित्वमिति द्रं
क्तां स्फुटयति। चैतन्येति। तस्यैव पुरुषार्थस्याप्रतिपत्तौ नास्ति कारणमित्याह।

सत्यमाह भवानत्र विज्ञानं नैव विद्यते हेतुः पदार्थबोधो हि वाक्यार्थावगते
रिति। १०। अंतःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः। आनंदरूपः सन्किं
नात्मानं प्रपद्यसे। ११। सत्यानंदस्वरूपं हि साक्षिणं ज्ञानविग्रहं। चिं
तयात्मतयाभिसंसक्तो देहादिगां धियं। १२। श्रीशिवः।

सन्निति। ११। ननु देहादिष्वात्मबुध्यप्रतिबंधात्कथं ब्रह्मात्मप्रतिपत्तिरित्याशंक्य सात्वं
स्य पूर्वश्लोकोक्तमात्मस्वरूपमनुवदन्नुत्तरमाह। सत्यानंदेति। १२।

१ ×टीकात्रुटितपंक्तिः। रूपत्वेन जिज्ञास्यत्वमाह। आनंदेति। अनन्तत्वविरोधित्वं दर्श
यति। सत्यस्वरूपमिति। यथोक्तस्यत्वमर्थ

कथं पुनर्देहादिषु गतात्मबुद्धिः शक्या त्यक्तुमित्याशंक्य देहस्यानात्मत्वं साधयति। रूपादिमानिति। देहो नात्मा रूपादिमत्त्वाद्घटादिवदित्यर्थः। देहो नात्मेत्यत्रोक्ति कृत्वा कुंभवदित्यनुमानांतरमाह। पृथिव्यादीति। देहस्यानात्मत्वं तद्व्यतिरिक्तात्मप्रतिपत्तिमंतरेण न स्फुटीभवितुमर्हतीति नैरात्म्यप्रसक्तेरित्यादिति

रूपादिमान्यतः पिंडस्ततो नात्मा घटादिवत्। पृथिव्यादिष्वेतविकारत्वाच्च कुंभवत्॥१३॥ अनात्मा यदि पिंडोयमुक्तहेतुबलान्मतः। करामलकवत्साक्षादात्मानं प्रतिपादय॥१४॥ घटद्रष्टा घटाद्भिन्नः सर्वथा न घटो यथा। देहद्रष्टा तथा देहो नाहमित्यवधारय॥१५॥ श्रीशिवः।

मत्वानभ्यादयति। अनात्मेति॥१४॥ योयं द्रष्टा स तस्माद्भिद्यते। यथा घटद्रष्टा घटादिति व्याप्तिमाह। घटद्रष्टेति। देहस्यातिरिक्तस्यात्मत्वेपि घटद्रष्टा घटादस्य व्यासिरतिप्रसक्तेस्त्याह। सर्वथेति। अहमपि देहद्रष्टा देहाद्भिन्नो घटादिवत् घटद्रष्टेत्यनुमानमानमाह। देहद्रष्टेति॥१५॥ ॥

इंद्रियद्रष्टृत्वान्नाहमिंद्रियाणि किं तु तेभ्यो भिन्नो द्रष्टैव देहादिष्वनुमानादिंद्रि-
याणामनात्मत्वमाह । एवमिति । एतन्न्यायं मनोबुद्ध्यादिष्वतिदिशति । मन इति ॥
१६ देहादिसमूहस्यात्मत्वं वारयति । संघातोपीति । तत्र तत्रात्मनो द्रष्टृत्वं फ-
लितमाह । दृश्येति । १७ । किं तदनुमानमित्यपेक्षायां पंचावयवमानं विर-
चयति । देहेति । देहस्याद्यत्वेन स्पष्टत्वं सहस्रांच शरीरं धर्मित्वेनोपादीयते । १७ ।

एवमिंद्रियदृङ्नाहमिंद्रियाणीति निश्चिनु । मनोबुद्धिस्तथा प्राणो
नाहमित्यवधारय ॥१६॥ संघातोपि तथा नाहमिति दृश्यविलक्षणं ।
द्रष्टारमनुमानेन निपुणं संप्रधारय ॥१७॥ [illegible] देहेंद्रियाद-
यो भावा हानादिव्यापृतिक्षमाः । यस्य सन्निधिमात्रेण सोहमित्यवधारय

किंच देहादिप्रवृत्तिश्चेतनाधिष्ठातृपूर्विका अचेतनप्रवृत्तित्वाद्रथादिप्रवृत्तिव-
दित्यनुमानांतरमाह । देहेंद्रियेति । देहः स्वव्यतिरिक्तद्रष्टृको दृश्यत्वात् । यो यो
दृश्यः स स्वव्यतिरिक्तद्रष्टृको दृष्टो यथा घटस्तथा चायं देहो दृश्यस्तस्मात्स्वव्य-
तिरिक्तद्रष्टृक एवेति ॥१८॥ श्रीशिवः ॥

वेक्य

५

ना०

स्वगतविचारवतो रथादिषु प्रवर्त्तकत्वप्रतिपत्ते रात्मनोपि देहादिप्रवर्त्तकत्वे वि
क्रियात्वं वै स्यादित्याशंक्य प्रवर्त्तकत्वं क्रियावत्वे व्याप्तेन भवस्य स्यांतव्यवि
चारादित्याह। औपलेइति।१८। अहंप्रत्ययालंबनत्वमात्मनः विवादादेहादीनां
चाहंप्रत्ययालंबनत्वे चेतनत्वावगमात् तद्व्यतिरिक्तात्मसिद्धिरिसोत्रैक्य

अनापन्नविकार स्वन्नयस्कांतवद्देवयः॥ बुध्यादीन्चालयेत्स्म
सकु सोहमित्येवमवधारय।१९। अजस्त्रमेवदा भांति यस्मांन्निध्या
जीउ अपि। देहेंद्रियमनःप्राणाः सोहमित्येवमवधारय।२०। अ
गमन्नेमनो न्यत्रसांप्रतं चस्थिरीकृतं। यं वै बोधदधी वृत्तिं सो
हमित्येवमवधारय।२१॥ श्रीशंकरः॥

वन्हि व्यासायः पिंडे दहति प्रत्ययवदात्मव्यासेषु देहादिष्वहंप्रत्ययालंब
नसंभवादतिरिक्तात्मसिद्धिरविरहस्याह। अजस्त्रमेवदिति।१९। आत्म जउा२
वदिति।२०। आत्मनो बुद्धिगतवृत्तिव्यतिरेकेहेतुंतरमाह। अगमदिति।२१।५

बुद्धितद्वृत्तीनां भावाभावयोर्वेदितृ समवस्थात्रयविशिष्टस्य विक्रियावतः
स्वीकर्तव्यं तथाविधस्यैव लोके वेदितृत्वदर्शनादित्याशंक्याह। स्वप्नेति। य
थाधियां बुद्धितद्वृत्तीनां भावाभावानविक्रियः सन्वेत्ति तथावस्थात्रयमपि
कूटस्थः स आत्मा साक्षात्प्रतिपद्यते तथा चावस्थाभ्यां विक्रियायाश्चावेद्य

स्वप्नजागरिते सुषुप्तिं भावाभावौ धियां तथा। यो वेत्त्यविक्रियः साक्षा
त्सोहमस्मीत्यवधारय ॥२३॥ घटावभासको दीपो घटादन्यो यथेष्य
ते। देहावभासको देही तथाहं बोधविग्रहः ॥२४॥ श्री शिव ॥ ॥

कोटिनिवेशनान्वेदितुरवस्थावत्त्वं विक्रियावत्त्वं चेत्यर्थः ॥२३॥ किं आत्मा
देहाद्भिद्यते तदवभासकत्वाद्यो यदवभासकः स ततस्माद्भिन्नो यथा प्रदी
पो घटावभासको घटादित्यनुमानेनात्मनो देहव्यतिरेकं दर्शयति। घटेति।
घट इष्टे सत्र दृष्टान्तेनात्मनो दृश्याद्देहादन्यत्वमुक्तं। दृष्टान्तसाधितत्वादात्म
नः साक्ष्याद्वृहा। भिन्नत्वमुच्यत इत्यपौनरुक्त्यं। कथं पुनरात्मनो देहावभास
कत्वमित्याशंक्याखण्डस्फुरणरूपस्य सन्निधिमात्रेणेत्याह ॥ बोधेति ॥२४॥

वस ६ टी

देहादिव्यतिरिक्तस्य चिद्रूपस्यात्मनः सुखरूपत्वं साधयति। पुत्रेति। आत्मासु
खं परप्रेमास्पदत्वात् दुःखवदित्यतिरेक्यनुमानादात्मनः सुखत्व
सिद्धिरित्यर्थः ।२५। अनुभववाद्ध्यं नेनेहं [?] स्पष्टयति। परप्रेमेति।२६। किं
पुनरनेन प्रबंधेन त्वंपदार्थस्वरूपं निरूपितं भवतीत्याशंक्य परिशोधित

पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः। द्रष्टा सर्वप्रियतमः
सोहमित्यवधारय ।२५। परप्रेमास्पदतया मा न भूवमहं सदा।
भूयासमिति यो द्रष्टा सोहमित्यवधारय ।२६। यः साक्षिलक्षणो
बोधस्त्वंपदार्थः स उच्यते। साक्षित्वमपि बोद्धृत्वमविकारितयात्मनः ॥

त्वंपदार्थं संक्षिपति। यः साक्षीति। साक्षित्वं साक्ष्यविषयेक्षणकर्तृत्वेन विका
रित्वं स्यादित्याशंक्याह। साक्षित्वमिति। अविकारितया बोद्धृत्वं नाम बोधैक
रसत्वं तदीयसंनिधिमात्रेण साक्ष्यप्रतीतेर्बोद्धृत्वमुपचरितमित्यर्थः ।२७
श्रीशिवः ।

६

संक्षेपविस्ताराभ्यामुक्तं त्वंपदार्थमुपसंहरन्ति। देहेंद्रियेति जन्मसत्ताविपरि
णामवृद्ध्यपक्षयविनाशाः षड्भावविकाराः।२८। देहद्वयव्यतिरिक्तो निर्विकारश्चि
द्रूपस्त्वंपदमभिधायस्येति मुमुक्षोरात्मा त्वंपदार्थ इत्युक्तमर्थमनूद्य तत्पदार्थनिरूपण
मवतारयन्तः परश्लोकमिति प्रश्नं प्रस्तौचष्टे। त्वमर्थ इति। तच्चिंतां ह्यधिभजते। अतद्व्या

देहेंद्रियमनःप्राणाहंकृतिभ्यो विलक्षणः। प्रोज्झिताशेषषड्भावविकारस्त्वंप
दाभिधः।२८। त्वमर्थमेवं निश्चित्य तदर्थं चिंतयेन्मुनः। अतद्व्यावृत्तिरूपेण
साक्षाद्विधिमुखेन च।२९। निरस्ताशेषसंसारदोषोऽस्थूलादिलक्षणः। अ
दृश्यत्वादिगुणकः पराकृततमोमलः।३०। निरस्तातिशयानंदः सत्यप्र
ज्ञानविग्रहः। सत्तास्वलक्षणः पूर्णः परमात्मेति गीयते।३१श्लोकाः॥

वृत्तीति।२९। आरोपितप्रपंचनिराकरणमुखेन तत्पदार्थनिरूपणं विदधाति। नि
रस्तेति।३०। यत्तु साक्षाद्विधिमुखेनेत्युक्तं तत्प्रपंचयन्ति। निरस्तातिशयेति। एता
वता परमात्मपदार्थस्य कथं निर्धारणमित्याशंक्याह। सत्तेति।३१।—।

ति

तस्य श्रुतिसिद्धं तटस्थलक्षणं विवक्षन्नाह। सर्वज्ञत्वमिति। यः सर्वज्ञः सर्वविदेष
सर्वेश्वरः परास्य शक्तिरित्यादिवाक्यानि वेदशब्देन गृहीतानि। [illegible] यत्तु सन्मा
त्रत्वेन पूर्णत्वमुक्तं तत्कथं संभवतीत्यपेक्षायामाह। यज्ज्ञानादिति। येनाश्रुतं श्रुत
मात्मनि रचन्त्येव दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं। कस्मिन्नु भगवो विज्ञाते स
र्वमिदं विज्ञातं स्यादेवं विधानि वाक्यानि श्रुतिशब्देन गृह्यन्ते। मृदाद्यनेकदृष्टान्तैरि

सर्वज्ञत्वं परेशस्य तथा संपूर्णशक्तिता। वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यव
धारय। २२। यज्ज्ञानात्सर्वविज्ञानं श्रुतिषु प्रतिपादितं। मृदाद्यने
कदृष्टान्तैस्तद्ब्रह्मेत्यवधारय॥ २३॥ श्रीशिवः॥

सत्रादिशब्देन लोहमणिनखनिकृन्तनदुन्दुभिशंखवादयो दृष्टान्ता उक्तास्तद्विका
राणां तत्तत्स्वरूपव्यतिरेकाणामभावप्रतिपादकाः स्वीक्रियन्ते। तेषु हि कारणज्ञा
ते तद्व्यतिरिक्तकार्याभावादज्ञातव्यावशेषो नास्तीति एवं ह्यपेतानैरेतैः सन्मा
त्रे ज्ञाते तद्व्यतिरिक्ताकाशाद्यभावात्तन्मात्रे ज्ञाते ज्ञातमेव सर्वमिति प्रतिपादितं [illegible]

धां द्योग्यश्रुत्यासन्मात्रं ब्रह्मेत्युक्तं। संप्रति तैत्तिरीयकश्रुत्यासत्यं ज्ञानानंतानंदात्मकं ब्रह्मे
त्याह। यदानंदमिति। ब्रह्मविदाप्नोति परमिति सूत्रितस्य ब्रह्मणो लक्षणबुभुत्सायां स
त्यं ज्ञानमनंतमिति सत्यज्ञानात्मकस्यानंतं सर्वप्रकारपरिच्छेदाभावरूपं प्रतिज्ञा
यद्वैतभेदस्तिकथमतदित्यपेक्षायामानंदसिध्यर्थं द्वैतप्रपंचस्याकाशादिलक्ष
णस्य प्रकृतब्रह्मकार्यत्वं तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्याद्या श्रुति

यदानंदं संप्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ। तत्कार्यत्वं प्रपंचस्य तद्ब्रह्मैत्य
वधारय।३४। विजिज्ञास्यतयायेत्युवेदांतेषु मुमुक्षुभिः। समर्थितेति
यत्नेन तद्ब्रह्मेत्यवधारय॥३५॥ श्री भाव:॥ ॥

र्विकारस्य प्रकृतिव्यतिरेकेणाभावमभिसंधायोक्तवतीत्यतो ब्रह्म आनंत्यं प्रसिद्ध
मित्यर्थः।३४। अथयथोक्तयारीत्या सर्वधानप्रसिद्धं ब्रह्मन हि कर्मिणः संसारस्सि
काब्रह्मवेदितुं उत्सहंति तत्राह। विजिज्ञास्यतयेति। तद्धि जिज्ञासस्व सोन्वेष्टव्यः
स विजिज्ञासितव्यः आत्मा अरे द्रष्टव्यः पं उतामेधावीत्येवं विधानि वाक्यानि
वेदांतशब्देनोच्यंते। अतियत्नेन शमादिगुणराशिसंपादनद्वारेणेति यावत्।३५

तर्हि कर्तृकर्मभावेन जीवब्रह्मणोर्भेदः स्यादित्याशंक्याह। जीवात्मनेति। तथापि नियम्य
नियंतृभावेन भेदस्ताद्वस्थ्यमित्याशंक्य कल्पितं भेदमादायतदुपपत्तिमभिप्रेत्याह। नि
यंतृत्वं चेति। वेदेषु तत्सृष्ट्वा तदेवानुप्राविशत्। स एष इह प्रविष्टो नेन जीवेनात्मनानुप्रवि
श्य य आत्मनि तिष्ठन्नन्तरः प्रविष्टः शास्ता इत्यादिवाक्येषु श्रुतिपाठवत्। ३६। एष ह्येव साधु
कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं य
जीवात्मनाप्रवेशाच्च नियंतृत्वं च तान्प्रति। श्रूयते यस्य वेदेषु तत्कर्मेत्यवधार
य। ३६। कर्मणां फलदातृत्वं यस्यैव श्रूयते श्रुतौ। जीवानां हेतुकर्तृत्वं तत्कर्मे
त्यवधारय। ३७। तत्त्वंपदार्थौ निर्णीतौ वाक्यार्थश्चिंत्यतेऽधुना। तादात्म्यम
त्र वाक्यार्थस्तयोरेव पदार्थयोः॥ ३८॥ श्रीशंकर॥ ८॥

मधो निनीषत इति श्रुतिमभिप्रेत्याह। कर्मणामिति। जीवानां कर्तृत्वेन व्यवस्थिता
नां हेतुकर्तृत्वं कारयितृत्वमित्यर्थः। इत्थं बादरायणपूर्वकं तादात्म्यं वाक्यार्थमिति य इ
ति तृतीयं प्रश्नं प्रत्याह। तत्त्वंपदार्थाविति। कोऽसौ वाक्यार्थो यो त्र चिंतनीयत्वे
न प्रतिज्ञात इत्याशंक्याह। तादात्म्यमिति। अत्रोक्तमहावाक्यात्मकः॥ ३८॥ ८॥

नीलमुत्पलमिति वत्पदार्थसंसर्गो वा गामानयेति वद्विशिष्टपदार्थो वा किमिति वाक्यार्थो
न भवतीत्याशंक्याह। संसर्गो वेति। अत्रेति पूर्ववन्महावाक्यविषया सप्तमी येतु तादात्म्यं
भेदसहमभेदमभिधत्ते तान्प्रति तादात्म्याख्यं प्रवक्तं वाक्यार्थं विशिनष्टि। अखंडेति।
३९। तर्हि किमनूद्यं किंवा विधेयमध्यकृत्यपर्यो वाक्यार्थः सेत्स्यतीत्याशंक्य व्य
तिहारस्य विवक्षितस्यैतादृशपि स्थितमुद्देश्यविधेयत्वमित्याह। प्रत्यगिति। ब्रह्मात्म
संसर्गो वा विशिष्टो वा वाक्यार्थो मात्रसंशयः। अखंडैकरसत्वेन वाक्यार्थो विदु
षां मतः।३९। प्रत्यग्बोधाय आभाति सोऽद्वयानंदलक्षणः। अद्वयानंदरूपश्च
प्रत्यग्बोधैकलक्षण।४०। इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्। अ
ब्रह्मत्वमर्थस्य व्यावर्त्तेत तदैव हि।४१। तदर्थस्य च पारोक्ष्यं यद्येवं किं
ततः शृणु। पूर्णानंदैकरूपेण प्रत्यग्बोधोवतिष्ठते।४२। श्री शिवः।।
नोरन्योन्यतादात्म्यप्रतिपत्तौ किं स्यादित्याशंक्याह। इत्थमिति। तादात्म्यप्रति
पत्त्यात्मत्वमर्थगतब्रह्मत्वस्य तदर्थगतपारोक्ष्यस्य च निवृत्तावपि किं फलिष्यतीत्या
शंकते। यद्येवमिति। श्रोतृचेतःसमाधानप्रार्थनापूर्वकमुत्तरमाह। शृण्विति।।

तत्त्वमस्यादिवाक्यं तत्प्रतिपाद्यमिति चतुर्थं प्रश्नं प्रतिविधत्ते। तत्त्वमस्यादीति ॥४३॥
कथं पुनः श्रोतॄणां वाच्यार्थयोर्लक्ष्यार्थावुपादाय वाक्यस्य वाक्यार्थबोधने प्रवृत्तिरित्या
शंक्याह इहेत्येतिति। आख्यातं बहुसो वाक्ये वक्ता वितिशेषः ॥४४॥ तत्रोक्तमेव सुखप्र
तिपत्त्यर्थमनुक्रामन्नाहोक्तं पदं वाच्यार्थमेकधयस्यालंबनतयेति ॥४५॥ तत्सद्वाच्य
तत्त्वमस्यादिवाक्ये च तादात्म्यप्रतिपादने। लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रव
र्तते ॥४६॥ इत्यादौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने। यथा प्रवर्त्ततेऽस्मापि
स्तथा व्याख्यातमादरात् ॥४७॥ आलंबनतया भातियोस्मत्प्रत्ययशब्दयोः।
अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥४८॥ मायोपाधिर्जगद्योनिः सर्व
ज्ञत्वादिलक्षणः। पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥४९॥ प्रत्यक्प
रोक्षतैकस्य सद्वितीयत्वपूर्णता। विरुध्यते यतस्तस्माल्लक्षणा संप्रवर्तते ॥५०॥
मर्थं निर्दिशति। मायोपाधिरिति। वस्तुतस्तस्य सत्याद्यात्मकत्वं ॥४९॥ विशिष्टौ वाच्यौ
परित्यज्य प्रत्यक्चैतन्यमात्रं त्वंपदेन लक्ष्यं तत्पदेन चाद्वितीयं चैतन्यमिति विव
क्षितत्वाल्लक्षणाप्रयोजकमाह। प्रत्यगिति ॥५०॥ श्रीशिवः ॥८॥

संप्रति लक्षणा लक्षणमाह। मानांतरेति। गुणवृत्तिव्यावृत्त्यर्थं मुख्यार्थेनेत्यादि विशेषणं। मुख्यां वृत्तिं व्यावर्तयितुं प्रथमं विशेषणं। कुंडपायिनामयनेत्त्वग्निहोत्र शब्दः सायंप्रातराहुत्य। निर्वृत्यापूर्व सादृश्यान्मासगुणके कर्मांतरे प्रकरणांतर स्थ गुणवत्त्सा वर्त्तितो विषभोजनवाक्ये तु पदद्वयलक्षणायामुक्तलक्षणमवि

मानांतरविरोधे तु मुख्यार्थस्य परिग्रहे॥ मुख्यार्थेना

न्वितेप्रतीतिर्लक्षणोच्यते॥४८॥ श्रीशिवः॥=॥

रुद्धं सिध्यति। विषशब्दस्य हि प्रवृत्तप्रयोगे मुख्यार्थे नियमेनान्वसंबंधम नुभवति॥ क्रियापदार्थमध्यायं निवृत्ति नियतो तोनाव्याप्तिरिति भावः॥

४८॥

वाक्य

१०

ननु किमत्र जहल्लक्षणा या मुत लक्षणं [illegible] किंस्विद् वा अजहल्लक्षणा। अहो जहद
जहल्लक्षणा। प्रथमे सर्वथा वाच्यपरित्यागात्तल्लेनो जडत्वं प्रसङ्गश्च स्यात् द्वि
रूपत्वमापद्येत। द्वितीये विशिष्टत्वमुभयत्रापि स्पष्टमापतेत्। तृतीये द्वयोरपि
भागाभावादित्याशंक्या काव्यनिकं भागमादाय परिहरति। तत्त्वमस्यादीति। भा
गलक्षणा। वाच्येऽर्थे भागं परित्यज्य भागोपादानलक्षणा लक्षणेति यावत्। न चे

तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा॥ सोयमित्या
दिवाक्यस्थपदयोरिव नापरा॥४९॥ श्रीमुकुंदो जयति॥

यमप्रसिद्धा जहदजहल्लक्षणेत्याह। सोयमित्यादीति। स्वयं प्रत्यभिज्ञातं
देवदत्तैक्यं परस्मै बुभुत्सवे प्रतिपादयितुं सोयं देवदत्त इत्यादिवाक्यं प्रयुज्यते।
तत्र तद्देशकालवैशिष्ट्यस्य एतद्देशकालवैशिष्ट्यस्य चानुपपत्तिस्तत्त्वात् तद्वि
त्यागेन देवदत्तस्य स्वरूपमात्रं प्रदर्श्य यिलक्ष्यते। तथा चास्मिन् वाक्ये सोऽयमि
तिपदयोर्वाच्यार्थैकदेशत्यागेन तदेकदेशोपादानेन बुभुत्सितदेवदत्तैक्यपर्यवसा
नवत्तत्त्वमस्यादावपि जहदजहल्लक्षणया पदद्वयं महद्ब्रह्म सैकरसत्ववाक्यार्थे पर्यवस्यतीत्य

१०

ननु सकृदेव श्रुताद्वाक्यादधिकारिणो यथोक्तवाक्यार्थज्ञानसंभवादपेक्षिता श्रवणाद्यावृत्तिरुपे
क्षितेत्याशंक्य मंदमध्यमाधिकारिविषयतया तदावृत्तिसिद्धिरित्याशयेनाह। अहमिति ५०
श्रुत्याप्रसादेन वाक्यार्थज्ञानदार्ढ्यसंपत्तितेदैव स निदानसंसारस्य कार्यकारणसंघातस्य भ
तस्य क्ष्माणां कर्मबंधस्य च निरस्ते: सद्योमुक्तिः स्यादित्याह। श्रुतीति। श्रवणादेरावृत्तो
परिपाके श्रुतं स्मृतं वा वाक्यं वाक्यार्थसाक्षात्कारं संपादयतीति श्रुतिप्रसादः। शिष्येण
शुश्रूषया वशीकृतस्याचार्यस्तत्त्वमस्याद्यर्थः साक्षाद्भव। त्वमनुगृह्णातीत्याचार्यप्रसा
अहंब्रह्मेति वाक्यार्थबोधो यावद्दृढो भवेत्। शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं। ५०।
श्रुत्याचार्यप्रसादेन दृढो बोधो यदा भवेत्। निरस्ताशेषसंसारनिदानः पुरुषस्तदा। ५१।
विशीर्णकार्यकरणो भूतसूक्ष्मैरनावृतः। विमुक्तकर्मनिगडः सद्य एव विमुच्यते। ५२।
प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत्। किंचित्कालमनारब्धकर्मबंधस्य संक्षये। ५३।
दः। ५१। ५२। सद्योमुक्तिपक्षे गुरुसंप्रदायाभावाद्विद्योदयानुपपत्तिः। जीवन्मुक्तिशा
विरोधश्चेत्याशंक्य पक्षांतरमाह। प्रारब्धेति। कदा तर्हि विदेहकैवल्यमित्याशंक्य फलोप।
गेनारब्धकर्मणो नारब्धकर्मवन्निवृत्तौ प्रतिबंधाभावाद्भवति विदेहकैवल्यमित्याह।
नारब्धकर्मबंधस्येति। ५३। = । श्रीशिवः। = ।

केवल्यस्यप्रेप्सितत्वंसूचयति। निरस्तेति। नचगतिपूर्वकं तस्य प्राप्यत्वं सर्वत्रप्रा
प्तत्वादित्याह। वैष्णवमिति। हैरण्यगर्भादिपदापेक्षयावैलक्षण्यं वक्तुं परममि
त्युक्तं। तस्य प्राप्तिकत्वविवक्षयापदमिति विशेषितं। पुनरावृत्तौ हेत्वभावा
दांसंतिकी मुक्तिरेवेत्याह। पुनरावृत्तीति। नचैतन्न भोवदवंशेषव्यापकमिष्यं

निरस्तातिशायानंदं वैष्णवं परमंपदम्॥ पुनरावृत्तिर
हितं केवल्यं प्रतिपद्यते। ५२। इतिश्रीमत्परमहंसपरिव्राजे
कार्यश्रीशंकराचार्यविरचिता लघ्वीवाक्यवृत्तिः॥ श्रीशिवः॥

ते। किंत्वद्वितीयतयापरिपूर्णत्वेनावस्थितमित्याह। केवल्यमिति। तदेवं प्रश्नच
तुष्टयनिष्टंकथनद्वारा तत्त्वज्ञाने मुक्तिसाधनं संक्षेपतो निर्धारितमिति स्थि
तम्। वाक्यवृत्तेरियं वृत्तिः रुचिरा रचिता मया। पुनः सुरुचिनो याता संगता
पुरुषोत्तमे॥ १॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्री[illegible]पूज्यपादशिष्यभ
गवदानंदज्ञानविरचितं वाक्यवृत्तिविवरणम्॥ ६॥ शाके १६९२ विकृतिवत्सरे न ने

१२

प्रतीतिः। तथा प्रातिभासिकजीवस्य सच्चिदाभावाद्व्यावहारिके तिष्ठंति तस्यापि लये सच्चिदानंदाः साक्षिणि पर्यवस्यंतीति सिद्धं ॥४५॥ इति वाक्यसुधाविवृतिः॥ ६०॥ यत्तु वाक्यसुधामेतां विवृत्य विशदैः पदैः ॥ पुण्यमुपा

प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके। तल्लये सच्चिदानंदाः पर्यवस्यंति साक्षिणि॥४५॥ इति श्रीमच्छंकराचार्यविरचिता वाक्यसुधा॥ ॥ ६०॥ श्रीमत्सांबो जयति॥ ॥

र्जितं किंचित्तद्ब्रह्मणि समर्पये॥१॥ संदर्भोयं योगिनामेव गम्यः सम्यक् ज्ञातुं जातु नो मादृशेन ॥२॥ श्रीब्राह्मी दैवी तत्कृते मे न जाने जिह्वे जिह्वे वा प्रस्थितेति॥२॥ शके १६९३ विकृतस्य के वत्सरे याम्ये श्रावणे सितद्वादश्यां गुरौ जगन्नाथभट्टात्मज शंकरेण गौतमगोत्रेण लिखितेयं वाक्यसुधा पुस्तिः॥

वाक्य

१२

सुध

॥श्रीगणपतयेनमः॥ श्रीगुरुभ्योनमः॥ श्रीमद्दासनृपालोनिजबुद्धिविशुद्धये॥ पदैर्वाक्यसुधामेतां विवेचयतिनिर्मलैः॥१॥ तत्र तावद्भगवान्छंकराचार्यः अविद्याविषधरमुषितप्रबोधस्य जगतोनुग्रहाय वाक्यसुधानाम शास्त्रं संग्रहं चकार। रूपमिति। रूपं दृश्यमेव भवति तत्र मानसं दृक् पश्यतीति दृक् लोचनं दृश्यमपि भवति तत्र मानसं दृक्। दृष्टा मनसा हि लोचनं दृश्यते। धीवृत्तिशब्देन मनोवृत्तिरुच्यं

॥श्रीगणेशायनमः॥ रूपं दृश्यं लोचनं दृक् तद्दृश्यं दृक्तु मानसं॥
दृश्या धीवृत्तयः साक्षी दृगेव न तु दृश्यते॥१॥ श्रीशिवः॥१॥

टी॰ १ ते। ताः लोचनापेक्षया दृश्याः। साक्ष्यपेक्षया दृश्याः। साक्षी आत्मा साक्षी च दृगेव तु न तु दृश्यः। तस्य स्वतः प्रकाशत्वात्। एतेन दृश्यानां मिथ्यात्वं दृशः सत्यत्वमिति शास्त्रार्थो दर्शितः। दृश्यत्वाद्विषयेंद्रियवृत्तीनां मिथ्यात्वं। दृष्टत्वादात्मनः सत्यत्व मुक्तम्॥१॥ श्रीः

वाक्यसु

१

एकप्रकार मेव २

धातीव्र

इदानीं भेदाभ्यांतेषामसत्यत्वं। एकस्यादात्मनः सत्यत्वं श्लोकत्रयेणप्रतिपादयति॥
नीलेति। एकप्रकारमेवलोचनंनीलपीतस्थूलसूक्ष्महृस्वदीर्घादिभेदेननाना रूपाणिपश्यति। तथांधत्वमंदत्वपटुत्वभेदेनोनानारूपेषुनेत्रधर्मेषुएकप्रकारमेव मनःसंकल्पयति। इदंचोपलक्षणं। शीतोष्णमृदुखरादिभेदेननानाभूतंस्पर्शमेकप्रकार मेवत्वग्गृण्हाति। एवंश्रोत्रादावपि। कामोभिलाषः। संकल्पः कर्माध्यवसायः संदेहः सं
नीलपीता[illegible]स्थूलसूक्ष्महृस्वदीर्घादिभेदैः। नानाविधानिरूपाणिपश्यल्लोचनमे कधा॥ आंध्यमांद्यपटुत्वेषुनेत्रधर्मेषुचैकधा। संकल्पयन्मनःश्रोत्रत्वगादौ योज्यमि दं॥२॥ कामसंकल्पसंदेहाः श्रद्धाश्रद्धेधृतीतरे। ह्रीर्धीर्भीरित्येवमादिभासयत्येकधाचि तिः॥४॥ श्रीत्रिव॥८॥

शयः। श्रद्धास्तिक्ये तिप्रत्ययः। तद्विपरीताश्रद्धाधैर्यंच। लज्जाबुद्धिर्भीरित्येवमादिभे देननानाभूतंमनएकप्रकारमेवचितिरात्माभासयति॥२॥३॥४॥८॥

३ तेनीं सविकाराणां मिथ्यात्वं निर्विकारस्य ससत्वं परप्रकाश्यस्य मिथ्यात्वं। स्वप्रकाशस्य सस
त्वं प्रतिपादयितुमाह। [illegible]। नोदेतीति [illegible]। न जायते न नश्यति न वर्द्धते न क्षीयते स्वयमे
व प्रकाशते विनैव साधनमन्यं प्रकाशयति। आत्मा। आत्मव्यतिरिक्तं तु जायते नश्यति वर्द्धते क्षी
यते स्वयं न भाति अन्यन्न भासयति। भासयति पिदीपादि तदपि वर्त्यादिसाधनसापेक्षं।५।
ननु बुध्यादिकं स्वयमेव प्रकाशमानं अन्यानि च साधनं विनाप्रकाशयति इति प्रतीयते यत्त
लक्षमात्मै व तथेत्याह। चिच्छाया। छायेति। चिद्रूपस्यात्मनः प्रतिबिंबप्रवेशाद्बुद्धेः प्रकाशेण

नोदेति नास्तमायाति न वृद्धिं याति न क्षयं। स्वयं विभात्यथान्यानि भासयेत्साधनं
विना।५। छायाप्रवेशतो बुद्धौ भानं धीस्तु द्विधा स्थिता। एकाहंकृतिरन्या स्यादंतः
करणरूपिणी ॥६॥ श्रीशिवः॥=॥

भवति ननु स्वप्रकाशो बुद्धेः। तस्य प्रकाशस्य धीरिति नामधारणसत्वात्। सा द्विधा भव
ति। एकाहंकृतिरूपेणान्यांतःकरणरूपेणेति ॥६=॥

२

छायेति। चिच्छायायाः प्रकाशरूपायाः अहंकारेण प्रकाशरूपेणैक्यं यदा भवति तदाऽहंकारोपि प्रकाशते। यथाग्नेर्दाहकशक्तिमतो लोहपिंडेन यदैक्यं भवति तदा लोहपिंडस्यापि दाहकत्वं भवति। तथा देहोप्यहंकारेण सहैक्यं प्राप्य चेतनवद्भाति॥७॥ अहमिति। अहंकारस्य चिच्छायया देहेन साक्षिणा चैकात्म्यमेलनं भवति॥

छायाहंकारयोरैक्यं तप्तायःपिंडवन्मतं। तदहंकारतादात्म्याद्देहश्चिन्मयतामियात्॥७॥ अहंकारस्य तादात्म्यं चिच्छायादेहसाक्षिभिः। सहजं कर्मजं भ्रांतिजन्यं च त्रिविधं क्रमात्॥८॥ श्रीशिवः॥ =॥

येन मेलनेनाहमिति कार्ये चिच्छायाविष्टबुद्धिः परामृश्यते। अहमिति कायः परामृश्यते। अहमित्यात्मा च परामृश्यते। तच्च तादात्म्यं त्रिविधं भवति। सहजं कर्मजं भ्रांतिजं च। तत्र चिच्छायया सह यदहंकारस्य तादात्म्यं तत्सहजं। यच्च देहेन सहाहंकारस्य तादात्म्यं तत्कर्मजं। यत्साक्षिणा सहाहंकारस्य तादात्म्यं तद्भ्रांतिजमिति क्रमादेव ज्ञातव्यं॥८॥ =॥

१ × हंकारयोः सतोर्विद्यमानयोः सहजस्य तादात्म्यस्य छितस्य निवृत्तिर्न भवति। यावदहंकारो यावदिच्छा १
२ × यच्चात्माहंकारयोस्तादात्म्यं तत्प्रबोधान्निवर्त्तते॥ ~

संबंधिनौ चिच्छायायां तावन्निवृत्तिर्नास्तीत्यर्थः। संबंधिविनाशे निवृत्तिर्भवतीत्यर्थः। यत्तु शरीराहं
कारयोस्तादात्म्यं तत्कर्मक्षयान्निवर्त्तते। अज्ञानोदेवाहमित्यात्मपरिच्छेदो भवति। ९। अहमिति
प्रबोधेनात्माज्ञाने निवृत्ते अपरिच्छिन्न एवात्माहमिति प्रोच्यते। अहमिति। सुप्तौ सुषु

संबंधिनोः सतोर्नास्ति निवृत्तिः सहजस्य तु। कर्मक्षयात्प्रबोधाच्च निवर्त्तते
क्रमादुभे॥ ९॥ अहंकारलये सुप्तौ भवेद्देहोऽप्यचेतनः॥ अहंकारविकारा
र्द्धः स्वप्नः सर्वस्तु जागरः॥ १०॥ श्रीशंकरे॥ ॥ =॥

प्यवस्थायां अहंकारस्य लये जाते देहः स्वधर्ममेव प्राप्नोति अचेतन एव भवति॥ यदार्द्धोहंका
रविकारस्तदा स्वप्नावस्था भवति। यदा सर्वोहंकारो भवति तदा जाग्रदवस्था भवति। एवं
चितिः छायावेशेन बुद्धौ संज्ञा भवति सा द्विधा भवति। एकाहंवृत्तिरन्यांतःकरणरूपे
ण त्युच्यमिति॥ १०॥ =॥

तत्राहंकृतेप्रकारोदर्शितः। इदानीमंतःकरणप्रकारमाह। अंतरिति। चिच्छाययासैहैक्यं गतांतःकरणवृत्तिः स्वप्नेवासनां कल्पयेत्। यया वासनया गजादयः स्वप्ने दृश्यंते बोधेषु जाग्रदवस्थासु बहिः रूपादीन् कल्पयति। ११। मन इति। मनोहंकारमुपादाय जडात्मकं लिंगशरीरमेकमप्यवस्थात्रयं प्राप्नोति। जाग्रतो नाम जाग्रदवस्थायाः

अंतःकरणस्य वृत्तिश्चिच्छायायैक्यमागता। वासनां कल्पयेत्स्वप्ने बोधेषु विषयान्बहिः॥११॥ मनोहंकृत्युपादानं लिंगमेकं जडात्मकं। अवस्थात्रयमन्वेति जायते म्रियते तथा॥१२॥ श्रीशिव॥

जाग्रदवस्था स्वप्नावस्था सुषुप्त्यवस्था चेति मनस्यहंकारे च जाग्रति शरीरस्यापि जाग्रदवस्था। तद्द्वयस्यार्द्धलये शरीरस्यापि स्वप्नावस्था। सर्वलये सुषुप्त्यवस्था। जडात्मकस्य लिंगस्य हतसंगाद्विश्लेषरूपा मरणावस्थापीत्यर्थः॥१२॥=॥=॥

॰शक्तीति। ॰

लिंगमचेतनं तस्यचेतन्यसंश्लेषः किं कृतइत्याह मायाया अविद्यायाः शक्तिद्वयमस्ति। एका विक्षेपशक्तिः अन्या आवरणशक्तिः। विक्षेपशक्तिः आत्मस्वभावं विक्षिप्य शरीराद्युत्पादयति। आवरणशक्तिर्येन प्रबोधात्मना स्वरूपेण मुक्तिः स्यात् तदावरणं च ध्यासिद्धिं करोति। तदाह विक्षेपशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेदिति विक्षेपशक्तिः जगत्सृष्टिं कृतइत्युक्तौ ते अस्ति रेन के साकांक्षाया माह। सृष्टिरिति। सच्चिदानंदरूपेच अस्तिभा

शक्तिद्वयं हि मायाया विक्षेपावृत्तिरूपकं। विक्षेपशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेत्।१३। सृष्टिर्नाम ब्रह्मरूपे सच्चिदानंदवस्तुनि। अब्धौ फेनादिवत्सर्वं नामरूपप्रसारणम्।१४। श्रीशिवः।

तिप्रियात्मके। वस्तुनि नामरूपप्रकाशनं सृष्टिः। यथा फेनादिसृष्टिः तोयात्मके समुद्रे तोयस्यैवाघातपरिक्षोभादिना प्रकारांतरभासस्यापरे फेना इति नामरूपविशेषा जायंते। तथा बहुवस्त्रादि विवर्तवसंपर्काद्घटिकालिकावस्त्रं संज्ञां प्राप्नोति। नीलं रूपं भवतीत्यादिशब्दार्थः।१५। ॥

४
सा२

अंतरिति। सा तु द्वितीया वृत्ति शक्तिः अविद्याया दृग्दृश्ययोर्भेदमावृणोतिसेयं आवृत्तिशक्तिः। सा संसारस्य मूलं भवतीत्यर्थः॥१५॥ साक्षिजीवयोर्भेदं प्रतिपादयितुमाह। सा। क्षिणइति। साक्षिणः आत्मनो लिंगशरीरेणायुक्ते

अंतर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः। आवृणोत्यपरा शक्तिः सा संसारस्य कारणं॥१५॥ साक्षिणः पुरतो भातं लिंगदेहेन संयुतं। चितिच्छायासमावेशाज्जीवः स्याद्व्यावहारिकः॥१६॥ श्री शिवः॥

तत्पुरतो भातं स व्यावहारिको जीवो भवतीति। सुखदुःखादिभोगार्थं व्यवहरति॥ कस्मात्पुरतो भातं भवति चिच्छायासमावेशात् आत्मप्रतिबिंबावेशात्॥ ४

१६॥८॥

तस्येति। तस्य साक्षिणोप्यारोपा दावृत्तौ विलसितं जीवत्वं भवति। आवृत्तौ नष्टायां
पुनः बिंबप्रति बिंबयोर्भेदे भातेप्रकाशिते तज्जीवत्वं प्रयाति अपगच्छतीत्यर्थः॥१७॥
अंतरावृत्ति विलास मुख्याद हिश्च ब्रह्मसर्गयोरितिसूचिता याव हि रावृत्तेर्विला

तस्य जीवत्व मारोपात्साक्षिणोप्यवभासते। आवृतौ तु विन
ष्टायां भेदे भाते प्रयाति तत्॥१७॥ तथा सर्गब्रह्मणोश्च भेदमा
वृत्य तिष्ठति। या शक्तिः शुद्धसद्ब्रह्म विकृतत्वेन भासते॥१८॥ श्रीशिवः॥

समाह। तथेति। तथा तेनैव प्रकारेण सर्गब्रह्मणोरपि भेद मावृणोति या शक्ति
स्तथेत्यध्याहारः। तथा शुद्ध सद्ब्रह्म विकृतत्वेन भासते विकृतं भासत
इत्यर्थः॥१८॥ ८॥

तत्राप्यावृत्तिनाशोस्तु सुषुप्तिवच्छिरपि आवृत्तिरूपायाः नाशो ब्रह्मप्रपंचयोर्भेदो भाति तयोश्च
ब्रह्मसर्गयोर्मध्ये सर्गे विकारः स्यात् । न तु कचिद्ब्रह्मणि विकारः स्यात् । आवृत्तिना
शे ब्रह्मजगतोर्भेदो भातीति कथं प्रतीयतस्तत आह । अस्तीति । सर्वत्र प्रपंचे अस्ती
ति प्रसयः प्रकाशात इति च प्रियमिति च । तथा रूपं नामच । आकाशादेरपि य

तत्राप्यावृत्तिनाशोस्तु विभाति ब्रह्मसर्गयोः । भेदस्तथा विकारः स्यात्सर्गेन
ब्रह्मणि क्वचित् ॥१९॥ अस्ति भाति प्रियं रूपं नाम चेत्यर्थपंचकं । आद्यंत्र
यं ब्रह्मरूपं मायारूपं ततो द्वयं ॥२०॥ श्रीशिवः ॥

द्यपि रूपं नास्ति तथापि अनेन शब्दादिरूपेणैव । अनेनैव तथ्यवच्छेदकस्य भावो विव
क्षितः । एतच्चार्थपंचकं सर्वैः सर्वत्र संमिलितमेव प्रतीयते । आवृत्तिनिवृत्त्यानु
अस्ति भाति प्रियमिति सच्चिदानंदरूपस्य ब्रह्मणो रूपं । रूपं नाम च जगतो
रूपं ॥२०॥

न्नि

तत्रोपपत्तिमाह। खेति। गगनपवनेंसलिलधारासु असंहतभूतेषु मनुष्या
दिषु च सत्ताप्रकाशानंदरूपेति त्रयो धर्माः न भिद्यंते। भिन्नत्वात्तद्वयं जग
द्रूपतया भासते। बेहिराद्दृष्टिनिनात्रे ब्रह्मप्रपंचयोर्भेदे ज्ञातेऽधिकारिणः स
माधिमुपदिशति। उपेक्षेति। जगद्रूपद्वयं नामरूपात्मकमुपेक्ष्य असत्स

खवाताग्निजलोर्वीषु देवतिर्यङ्नरादिषु॥ अभिन्नाः सच्चिदानं
दाः भिद्येते रूपनामनी॥२१॥ उपेक्ष्य नामरूपे द्वे सच्चिदानंदतत्प
रः। समाधिं सर्वदा कुर्यात् हृदये वाथवा बहिः॥२२॥ श्रीशिव॥

त्वेन गृहीत्वा सच्चिदानंदतत्परः तात्पर्यवान् समाधिं कुर्यात्। सर्वत्र तत्समाधे
स्तत्त्वसाक्षात्कारो न भवत्यत आह। सर्वदेति। तथा च स्मृतिः। ता सा च सततं
ध्येयमिति। कुत्र समाधिं कुर्यादित्यत आह। हृदये बहिर्वा। २२॥८॥

तत्र हृदयेयः समाधिस्तस्य द्वैविध्यमुद्दिश्य प्रथमस्य द्वैविध्यमाह। सेति। हृ
दि समाधिर्द्विविधो भवति एकः सविकल्पो द्वितीयो निर्विकल्पः। तत्र
सविकल्पं लक्षयति। दृश्यशब्दानुविद्धः। दृश्यार्थशब्दसंज्ञौ ताभ्याम
नुविद्धः। उल्लिखितसंबंधो यः समाधिः स सविकल्पः। अत एव द्विविधः।

सविकल्पो विकल्पश्च समाधिर्द्विविधो हृदि। दृश्यशब्दानु-
विद्धोऽयं सविकल्पः पुनर्द्विधा।२४। कामाद्याश्चित्तगा दृश्या-
स्तत्साक्षित्वेन चेतनं। ध्यायेद्दृश्यानुविद्धोऽयं समाधिः सविकल्पकः

दृश्यानुविद्धः शब्दानुविद्धश्चेति।२४। प्रथममाह। कामसंकल्पादयो मनोवि
लासाः दृश्यास्तस्य साक्षी समीक्षकः आत्मा इति यदा ध्यायेत्तदा दृश्या
नुविद्धः सविकल्पकसमाधिः॥२५॥ श्रीशिवः॥ ॥

द्वितीयमाह। असंगइति। असंगः संगवर्जितः व्यापकत्वात्सर्वसंगोस्तीत्यत
आह। सच्चिदानंदः नामरूपाभ्यां तस्य संगो नास्तीति। स्वप्रतिभासार्थम
पि परसंगमपेक्षत इत्यत आह। स्वप्रभस्तर्हि तस्मिन्व्याप्रभातस्या एव
संगो भविष्यतीत्यत आह। द्वैतवर्जितः। एवंभूतोयमात्मा सोहमस्तीति

असंगः सच्चिदानंदः स्वप्रभो द्वैतवर्जितः। अस्मीति शब्दविद्धो न
यं सविकल्पः समाहितः।२५। अनुभूतिरसावेशाद्दृश्यशब्दानु
पेक्षिकः। निर्विकल्पः समाधिः स्यान्निवातस्थितदीपवत्।२६।

शब्दानुविद्धः सविकल्पः समाधिः [२५]। निर्विकल्पसमाधिं तृतीयमाह। दृश्य
शब्दाभ्यां रूपेण नाम्ना चानपेक्षिकः। स्वानुभवरसास्वादं निर्वाताचलदीप
वद्भावो हृदि निर्विकल्पः समाधिः॥२६॥ श्री शिव॥=॥

एवं हृदि समाधित्रयं अभिधाय बहिः समाधित्रयमाह। हृदीति। यथा हृदि सविकल्पकः समाधिर्द्विधा भवति तथा बाह्यभेदेपि। बाह्यप्रपंचेपि सत्तामात्रं गृहीत्वा ततो नामरूपे निरस्य यः समाधिः स दृश्यानुविद्धः। सविकल्पकसमाधिश्चतुर्थः। सकुत्र भवतीत्याकांक्षायामुच्यते। यस्मिन्कस्मिन्वस्तुनि घटे पटे वा अन्यत्र वा तत्र नाम

हृदीव बाह्यभेदेपि यस्मिन्कस्मिंश्च वस्तुनि। समाधिराद्यः सन्मात्रा
न्नामरूपनिराकृतिः।२७। अखंडैकरसं वस्तु सच्चिदानंदरूपकम्॥
इत्यविच्छिन्नचिंतोयं समाधिर्मध्यमो मतः॥२८॥ श्रीशिवः॥ ८॥

रूपाभावे सन्मात्रे विशेषः कोपि नास्तीति बहिः शब्दानुविद्धः सविकल्पः।२७॥ पं१ हृद्य
पंचमं समाधिमाह। सैंधवखंडैकरसं सच्चिदानंदरूपकं वस्तु तदिति चिंताविच्छेदरूपवान्समाधिर्बहिः शब्दानुविद्धः सविकल्पः पंचमः। द्वितीयापेक्षया समध्यमो भवति। इति स्वग्रंथे मध्यम उक्तः॥२८॥

इदानीं बहिर्निर्विकल्पकं षष्ठं समाधिमाह। स्तब्धीति। पूर्वं निर्वातस्थदीपवत् रसास्वा
दात् स्तब्धीभावो। निश्चेष्टतयावस्थानं षष्ठो बहिर्निर्विकल्पकः समाधिरित्यर्थः। तत्प्रा
प्यते। श्लोकोत्तरार्द्धेन निदिध्यासनविधिमुपदिशति। एतैरित्यादि। एतैः षड्भिः स
समाधिभिः कालं निरंतरं गमयेत्। उक्तानामपि समाधिभेदानां नामानि दर्श्यंते। हृ
दिदृश्यानुविद्धः सविकल्पकः १ हृदि शब्दानुविद्धः सविकल्पः २ हृदि निर्विकल्पकः ३

स्तब्धीभावो रसास्वादात् समाधिः पूर्ववन्मतः। एतैः समाधिभिः षड्भिर्नयेत्का
लं निरंतरं। २९। देहाभिमाने गलिते विज्ञाते परमात्मनि। यत्र यत्र मनो या
ति तत्र तत्र समाधयः ॥ ३० ॥ = ॥ श्रीशिवः ॥ = ॥

बहिर्दृश्यानुविद्धः सविकल्पकः ४ बहिःशब्दानुविद्धः सविकल्पकः ५ बहिर्निर्विकल्प
श्चेति। ६ । २९ । अभ्यासयोगात्समाधिसिद्धौ फलमाह। देहेति। अहंकर्ताऽहंभोक्तेत्या
दिर्देहसंबंधार्थो ऽभिमानः स देहाभिमानः तस्मिन् गलिते नष्टे सति यत्नं विनापि यत्र य
त्र मनः प्रवर्त्तते तत्र ब्रह्मैव प्रवर्त्तते। इतिकारणात् तत्र तत्र समाधयः ॥ ३० ॥ = ॥

एतदर्थप्रतिपादनार्थमागमं लिखति। तस्मिन्परावरे दृष्टे हृदयग्रंथिरहंजोमिथ्याभिनिवेशः स भिद्यते पृथग्भवति। संशयाश्च सर्वे छिंद्यंते कर्माणि च सुकृतदुष्कृतरूपाणि च सर्वाणि क्षीयंते। परावर इति। परमात्मा त्वैकभावरूपतत्वे। यद्वा। परे विरिंच्या

भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः। क्षीयंते चास्य कर्माणि तस्मि
न्दृष्टे परावरे ॥३१॥ अवच्छिन्नश्चिदाभासस्तृतीयः स्वप्नकल्पितः॥
विज्ञेयस्त्रिविधो जीवस्तत्राद्यः पारमार्थिकः ॥३२॥ श्रीशिवः ॥ ॥

दयऽवराः यस्मात्स परावरः। ३१। इदानीं जीवस्य त्रैविध्यमाह। अवच्छिन्न इति। जीवस्त्रिविधो ज्ञेयः एकोऽवच्छिन्नः द्वितीयश्चिदाभासः तृतीयः स्वप्नकल्पित इति। त्रयाणां मध्येऽवच्छिन्नस्य सत्यत्वमाह। तत्राद्यः पारमार्थिक इति। ३२। ॥

व. का. श्रा

नन्ववछिन्नघटार्घटेसत्संप्रतीयते यदिजीवोप्यवछिन्नस्त दातस्याप्यसत्व मिस्यत आह। अवछेद इति। यथाघटावकाशादौ अवछेदो घटादिनापरिमितत्वे मेवकाल्पनिकं नत्वाकाशः। तथाजीवस्याप्यवछेदः स एव कल्पितः येनब्रह्मणि जीवत्वमारोप्यते। स्वभावतस्तु तस्य ब्रह्मत्वमेव। यथाघटाकाशस्य स्वभाव

अवछेदः कल्पितः स्याद्वछेद्यं तु वास्तवं॥ तस्य जीवत्वमारोपाद्ब्रह्मत्वं तु स्वभावतः॥३३॥ अवछिन्नस्य जीवस्य पूर्णेन ब्रह्मणैकताम्॥
तत्वमस्यादिवाक्यानि जगुर्नेतर जीवयोः॥३४॥ श्रीशिवः॥=॥

तो महदाकाशत्वमेव तथेत्यर्थः॥३३॥ तत्वमस्यादिवाक्यैरप्यवछिन्नस्यैवं जीवस्य पूर्णब्रह्मणैक्यमुच्यते॥ नत्वाभासिकस्वप्नकल्पितयोर्जडजीवयोः॥३४॥
=॥

स्य

ब्रह्मणीति। विक्षेपावृत्तिरूपं यस्यामस्ति सा माया ब्रह्मण्यवस्थिता। तत्रावृ
त्या खंडता भेदो भवति। अन्यस्मिन्विक्षेपो जीवे जगत्प्रकल्पते। जीवे

ब्रह्मण्यवस्थिता माया विक्षेपावृत्तिरूपिणी। आवृ
त्याखंडतावृत्त्यान्यस्मिन्जगज्जीवप्रकल्पते। २५।
जीवांतःस्थश्चिदाभासो जगत्स्याद्भूतभौतिकं।
अनादिकालमारभ्य मोक्षात्पूर्वमिदं द्वयम्॥ २६॥

अंतरवस्थितो जीवश्चिदाभासो भूतभौतिकं च जगत्स्यात्। एतद्द्वयमना
दिकालमारभ्य प्रवर्त्तते। यदा मोक्षो भवति तदा ब्रह्मीभावे द्वयं निवर्त्तत इ
त्यर्थः॥ २६॥ श्रीशिवः॥ ८॥

स्वप्नकल्पितमुक्त्वा प्रातिभासिकजीवमाह। प्रातीति॥ यः प्रातिभासिकजीवः सः
जगत्प्रातिभासिकं वास्तवं परमार्थिकं मन्यते। ३९॥ व्यवहारिकेति॥

प्रातिभासिकजीवोयस्तज्जगत्प्रातिभासि
कं॥ वास्तवं मन्यतेन्यस्तु मिथ्येति व्यावहारि
कः॥३९॥ व्यवहारिकजीवोयस्तज्जगद्व्यावहारि
कं॥४०॥ सत्यं तथेति मिथ्येति मन्यते पारमार्थिकं ४०

यो व्यवहारिको जीवः स तद्व्यावहारिकं जगत्सत्यं मन्यते। तथैव स्थितं पा
रमार्थिकं मिथ्येति मन्यते।४०॥८॥ श्रीशिवः॥

चिदेति। चिदाभासे जीवे विक्षेपावृत्तिरूपा निद्रा अविद्या जीवजगती अवृणो
ति। तत्रैव पूर्वे नूतने जीवजगती मूले इह जन्मनि अनुभूते च जीवजग
ती कल्पयेत्। स जीवः स्वप्नकल्पितस्तृतीय इत्युच्यते। कल्पितजीवापेक्षया
तु द्वितीयः। ३७। [illegible] । एतयोः कथं परिकल्पितत्वमाह। प्रतीतेति। एते जीव

चिदाभासस्थिता निद्रा विक्षेपावृत्तिरूपिणी। आवृत्तिजीवजगती पूर्वेनू
ले च कल्पयेत्। ३७। प्रतीतकाल एवैते स्थितत्वात्प्रातिभासिके। नहि
स्वप्नप्रबुद्धस्य पुनः स्वप्ने स्थितिस्तयोः॥ ३८॥ श्रीशिवः॥ ८॥

जगती काल एव स्थिते। न त्वन्यदा स्वप्नातिरिक्तावस्थायां। तदेव दर्शयति। नहि
स्वादि। स्वप्नप्रबुद्धस्य पुरुषस्य पुनः स्वप्नतया स्थितिर्न स्वप्नानां भिन्नवि
षयत्वात्। ३८॥ ८॥

वाक्य ११ रत्ना०

साक्षिस्थाइति। तथा साक्षिणि स्थिताः सच्चिदाभावाः व्यावहारिके जीवे संबंधा
त्तथैव तद्व्यवहारेण प्रातिभासिके जीवे अनुगच्छंति। द्वितीयार्थे सप्तमी॥ एकस्मा
त्स्मान्नमंगीकुर्वंति वेदांतिनः आत्मतैत्रयस्थापनं उपहासायेति मत्वा दृष्टांत

साक्षिस्थाः सच्चिदानंदाः संबंधाद्व्यावहारिके। तद्द्वारेणानुग
च्छंति तथैव प्रातिभासिके॥४३॥ लयेफनस्य तद्धर्मा द्रवाद्याः
स्युस्तरंगके। तस्यैव विलये नीरे तिष्ठंत्येते यथापुरा॥४४॥ श्रीशिवः॥

द्वारेण तल्लयप्रकारमाह। यथा जलफेनस्य शीर्णत्वादिना विनाशाद्द्रवमाधुर्य
शैत्यादयो धर्मास्तरंगके तिष्ठंति। तस्य तरंगस्यापि निर्वातादिना विलये तद्ध
र्माः जले तिष्ठंति॥४४॥ ८॥

पारमार्थिकजीवप्रकारमाह। पारमार्थिकेति। पारमार्थिकजीवः पारमार्थिकं ब्रह्मैकंप्र
त्ययेनाव धारयति। अन्यं च न निरीक्षते यद्धि जगत् तदास्य स्यैनेव वा क्ष्यते। पूर्वश्लो
कानामभिप्रायसंग्रहः। स च मादौ यः प्रातिभासिको जीवः प्रातिभासिकं जगत्स्व
रूपं सत्यं मन्यते। जाग्रदवस्थायां स्थितो व्यावहारिकः। तस्य च प्रजगन्मिथ्याम
न्यते। पुनर्व्यावहारिको यो जीवः स ब्रह्मरूपा सोहं कल्पयेत्स्यादिति अन्यन्न वीक्षत इदं सत्यं
पारमार्थिकजीवस्तु ब्रह्मैकरूपं पारमार्थिकं। प्रत्येति वीक्षते नान्यदीक्षते त्वन
तात्मना ॥४१॥ माधुर्यद्रवशैत्यादि जलधर्मास्तरंगके। अनुगम्याथ तत्
न्निष्ठे फलेप्यनुगतास्तथा ॥४२॥ श्री शिवः।
असत्यं त्वन्यदपि वीक्षते। अन्यथा सर्वज्ञत्वहानिप्रसंग इति ॥४१॥ ननु सच्चिदानंदा भावाः
पारमार्थिके साक्षिणि युज्यंते तत्कथं व्यावहारिके प्रातिभासिके चाद्दताः इत्याकांक्षितं द
ष्टांतेन परयन्नाह। यथा जलधर्मा माधुर्यद्रवशैत्यादयस्तावत्तरंगके अनुगम्य स्थि
ताः स्वयं ते। तरंगनिष्ठे तरंगस्थिते शैवलफेनादिकादिफलेप्यनुगता भवंति ॥४२॥

जगद्व्यावहारिकं सत्यं मन्यते। नैव पारमार्थिको जीवो मिथ्येति मन्यते। ×

[OrderDescription]
,CREATED=26.11.19 15:11
,TRANSFERRED=2019/11/26 at 15:28:58
,PAGES=90
,TYPE=STD
,NAME=S0002171
,Book Name=M-2332-VRITRATNAKARVAY CHHED
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,